५१८८

५१८८

नामग्र — शतपथ ब्राह्मणभाष्य
वेदार्थ प्रकाशः

कर्ता — श्री सायणः
" हरिस्वामीन.

पत्र.सं. — १३३ सं. -x

विषयः — संहिता ब्राह्मणं.

शतपथ श्लो० ३३२०

॥ प्रथमकाण्डः ॥

॥श्रीगणेशायनमः॥श्रीभवानीशंकरःप्रसन्नः॥ ॥वागीशाद्याःसुमनसःस
र्वार्थानामुपक्रमे॥यंनत्वाकृतकृत्याःस्युस्तन्नमामिगजाननं १ यस्यनिःश्वसि
तंवेदायोवेदेभ्योखिलंजगत् निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं २ तत्कटा
क्षेणतद्रूपंदधतोबुक्कभूपतेः कृतावनरणःक्षीरसागरादिवचंद्रमाः ३
विजितारातिर्जातोवीरःश्रीहरिहरःक्षमाधीशः धर्मब्रह्माध्वन्यःसमादि
शत्सायणाचार्यं ऋग्यजुःसामशाखानां एकैकाव्याकृतात्वया तावतान
समानार्थास्तातुंशक्यास्ततःपराः वासनाविशदायत्रमंत्रार्थानामशेषतः प्राये
णाध्वर्यवंकर्मपूर्णशाखांतरैर्विना करामलकवद्यत्रपरंतत्त्वंप्रकाशितं याका
ण्वितादृशीशाखात्वयाव्याख्यायतामिति सर्वज्ञःसायणाचार्योविमृश्योदीरि
तान्गुणान् माध्यंदिनेशतपथेब्राह्मणेव्याकरोतिनत् संचारःपदवाक्यार्थन्या
यानांदर्शितःपुरा वेदानामर्थवत्त्वादियच्चान्यदुपयुज्यते सर्वशाखासमत्वेन
विज्ञेयंतदिहाखिलं यत्तुसंदिग्धमज्ञातमत्रतद्धिपरीक्ष्यते संमस्ताकल्पसूत्रा
णांब्राह्मणानांचसंग्रहात् इहहिचरमेचतुर्दशेकांडेकरतलामलकैवसरतत्वं १

प्रकाशितं ततः प्राकृतेश्च त्रयोदशकांडे त्रेताग्निसाध्यो धर्मः प्राधान्येन प्रतिपा
दितः अग्नयश्चाधानपवमानेष्टिभिर्निष्पाद्याः पवमानेष्ट्यश्च दर्शपूर्णमास
विध्यंतर्गाहितया तदधिगमसापेक्षत्वानारतिप्रथमे कांडे दर्शपूर्णमासौ प्रति
पाद्येते तदनुष्ठानारंभश्च पूर्णमासपूर्वकः अतश्च तस्य पूर्णमासस्य प्रथमं १
यदंगं व्रतोपायनं तदंगत्वेनापामुपस्पर्शनं विधत्ते व्रतमुपैष्यन्निति पूर्णमास
स्य च प्राथम्यमन्त्रे वाग्ने पौर्णमासप्रयोगं प्रथमं अभिधाय पश्चाद्दर्शप्रयोगाभि
धानं कात्यायनेनापि तथाभिधाय पौर्णमासवदन्यदिति पौर्णमासतंत्रस्य दर्शे
अतिदेशात् तथाहवै हैं ब्रह्मणे प्रजापतिपर्वसंधानप्रस्तावे पौर्णमासेन चामा
वास्येन च पौर्णमासीं चामावास्यां च तस सर्वाभिषज्यन्निति पौर्णमासप्राथम्यात्
तथा तैत्तिरीयके पौर्णमासं हविरिदमेषां मय्यामावास्यं हविरिदमेषां मयी
सन्वाधानानुमंत्रणयोर्यजमानमंत्रयोः पाठक्रमादपि पौर्णमासप्राथम्यमवग
म्यते ननु सर्वोयं पाठक्रमः श्रुत्यैव तु पौर्णमासप्राथम्यं प्रतिषिध्यते श्रुतिश्च पा
ठाद्बलीयसी श्रुसर्वपा ठमुख्यस्थानप्रवृत्तीनां क्रमप्रमाणानां मध्ये श्रुतेः प्रा

धर्म्येणैव नप्राबल्यात् श्रूयते हि पौर्णमासप्राथम्यनिंदा यः पौर्णमासीं पूर्वामा
लभेत प्रतिलोममेवैनावालभेतेति न तस्य वाक्यस्य सारस्वतौ होमौ पुरस्ता
ज्जुहुयादमावास्यायै सरस्वत्यनुलोममेवैनावालभत इति सारस्वतहोमविधि
2 शेषत्वेन पौर्णमासप्राथम्यनिंदार्थवादत्वात् अतउक्तरीत्या पौर्णमासप्राथ
म्यमुपपन्नं उपस्पर्शनं चेहाचमनं विवक्षितं न चापस्तंबेनाप आचामस्तुप
स्पृशतीति वदताआचमनप्रतिद्वंद्विभावेनोपस्पर्शनाभिधानात्स्पर्शनमात्रं
तत्प्रतिभाति सत्यं तत्र तथाप्यहहन्तु तेन पूतिं नं तरत इति वाक्यशेषादपोऽभ्यासं त
रत एव मेध्यो भवतीति वदाचमनमेव यथा अनक्ताः शर्करा उपदधातीत्यत्र घृ
त तैलादिषु अंजनसाधनत्वेन संदिह्यमानेषु तेजो वै घृतमिति वाक्यशेषात् घृत
मेवेति निश्चयस्तद्वत् सूत्रितं हि संदिग्धे तु वाक्यशेषादिति न स्पर्शव्रतोपायनां
गत्वमुपेष्यन्निति शतपथसमयेन व्रतोपायनस्याचमनं प्रति हेतुत्वाभिधानात् ल
क्षणहेतोः क्रियाया इति स्मृतेः प्रधानं हि स्वनिष्पत्त्यर्थमंगमनुष्ठापयत्तदनु
ष्ठाने हेतुर्भवति न च लक्षणेऽपि शत्रुविधानात् कथं हेत्वर्थनिश्चयः इति वाच्यं २

तथाहि भवितोष्यं व्रतेन लक्षितो यस्तत्पूर्वकालः तत्संबंधमाचमनस्य विधातुं व्र
तमुपैष्यन्निसेनतस्यात् तत्कालसंबंधश्चाचमनानंतरं व्रतोपायनस्य विधाना
त्पाठादपि सिध्यतीति लक्षणार्थस्वीकारे वचनमनर्थकमिति ननु व्रतोपायना
दपि प्रथममाहवनीयप्रणयनमग्न्यन्वाधानं च एत एवापस्तंबः प्रातरग्निहो
त्रं हुत्वाहवनीयं प्रणीयाग्नीनन्वादधातीति कात्यायनस्तु प्रणीतस्याहवनी
यादेरन्वाधानासंभवादर्थसिद्धं प्रणयनं मत्वाग्न्यन्वाधानमेव प्रथममाह अग्न्य
न्वाधानमध्वर्युर्यजमानो वेति ब्राह्मणं तु तदनभिधाय ततः परत्वेन व्रतोपायनं
तदंगमाचमनं वा कथमभिदधाति अत्राभिधीयते नियमेन याजमानानां मध्ये
व्रतोपायनमेव प्रथमं अग्न्यन्वाधानं हि नियमेन न याजमानं अध्वर्युर्यजमानो
वेति कात्यायनोक्तेः नन्वन्वाधानमंत्रस्य ममाग्ने वर्च इत्यस्य प्रसगाच्छीघ्रा नियमेन
याजमानत्वं युक्तं यथा आयुर्दा अग्नेस्यायुर्मे देहीत्यादेः तस्य हि समाख्यया आध्व
र्यवत्वप्राप्तावपि प्रसगाच्छीघ्रलिंगेन प्रबलेन समाख्यां बाधित्वा याजमानत्वं निर्ण
तं मंत्रास्तु कर्मकरणास्तद्वद्धिति ससमकरणमंत्रत्वात्तत्र तथात्सु ममाग्ने वचर इ
ति करणमंत्रत्वादाध्वर्यवक्रियायां विनियुक्तत्वाद्यजमानेन प्रयोगे तत्सन्निपाद

नासामर्थ्यादध्वर्युणैवप्रयोज्यमित्युक्तमुत्तराधिकरणेकरणेष्वर्थवत्त्वादिति
अनडुत्क्तयुक्तेस्तत्करणमन्वाधानमप्यध्वर्युणैवानुवानुष्ठेयं यत्तुकात्यायनेना
ध्वर्युर्यजमानोवेत्युक्तं तत्रयाजमानत्वं शाखांतरमूलं एतच्छाखानुसारेणत्वा
3 पस्तंबादिभिः केवलाध्वर्यत्वयुक्तमितिविभागः अथवायथाप्रणीतस्यान्वाधा
नानुपपत्त्याप्रणयनमप्यन्वाधानविधिनैव संगृहीतं कात्यायनसूत्रे तथाअंतरेणा ज्र ५
हवनीयंचगार्हपत्यंचप्राङ्तिष्ठन्नितिवचनादेवाग्निप्रणयनंतद्दलीकरणरूप
मन्वाधानंचार्थसिद्धत्वादनुक्तमित्युच्यमानांगमध्येव्रतोपायनस्यप्राथम्यमवि
रुद्धंविहितमुपस्पर्शनमनूद्यप्रशंसति तद्यदिति तत्सत्कृतं यदुपस्पर्शनं तेनां
त रतः पूतिः पवित्रताभवति अनृतवदनेनहिपुरुषासंभावितमपवित्रत्वमिति
ननूपस्पर्शनस्यफलमेवेदंपवित्रत्वंकिंनविधीयते कथमपिसंबंधाभावेपिहिफल
विधित्वंदृष्टंयथाप्रतितिष्ठंतिहयएतारात्रीरुपयंतीतिरात्रिसत्रे नरात्रिसत्रस्यप्र
नन्यशेषत्वेनस्वतंत्रतयाविधीयमानस्ययुक्तंयदर्थवादोप्यपेक्षितंफलंसमर्पयती
ति उपस्पर्शनस्यतुसंस्कारतयासंस्कार्येणैवप्रयोप्रयोजनेननिरपेक्षितस्यकथ
मपेक्षितंफलंसमर्थोऽर्थवादःसमर्पयितुंयथायदाङ्क्तेचक्षुरेवभ्रातृव्यस्यवृंक्तर ३

ति अत्र ह्यंजनस्य संस्कारतया फलमनपेक्षमाणस्य भ्रातृव्यचक्षुर्वर्जनं न
फलमिति॥ इति तं च द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात्
ननु साध्यसाधनेतिकर्तव्यतालक्षणे शाब्दे अनुप्रविष्टं किंचिदप्यर्थमनभिदधा
नस्य वाक्यस्यानर्थक्यमेव प्राप्तं आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामि
ति तत्रैव कस्यचिदंशस्य स्तुत्या भवत्यर्थवत्तेति चेत् प्रवृत्तिविशेषमकुर्वाणया
किं स्तुत्यापि॥ यतस्तु तं भ्रातृव्यं तावानेव सोऽर्थः अत्रोच्यते इह लिङादियुक्तेषु
वाक्येषु द्वे एव भावने शाब्दात्मिका च अर्थात्मिका च उक्तं च अभिधाभावनामाहुरन्या
मेव लिङादयः अर्थात्मभावनां त्वन्यां सर्वाख्यातेषु गम्यते॥ इति॥ एकैका च साध्यसाधनेति पु ८
कर्तव्यताभिः त्रिभिरंशैरंशत्रयवती॥ अर्थभावनायां हि स्वर्ग एकः साध्योंशः तत्कर
णमाग्नेयादिः साधनांशः प्रयाजादिरितिकर्तव्यतांशः तत्रैवार्थभावनायां पुरुषप्र
वृत्तिः शाब्दभावनायां भाव्यो लिङादिस्त्व्यापारो वा करणं अर्थवादिकी स्तुतिरिति
कर्तव्यता तत्रार्थभावनांशत्रयस्यानभिधानेपि शाब्दभावनेतिकर्तव्यताभूतां स्तु
तिं ब्रुवाणोर्थवादः कथमनर्थकः स्यात् यदाह सूत्रकारः विधिना त्वेकवाक्यत्वात्
स्तुत्यर्थेन विधीनां स्युः॥ इति॥ स्तुतिविरहे ह्यंशस्यैवैकल्यादपरिपूर्णा शाब्दभावनया न प्रवृत्ति

घ। रर्थभावनायांप्रवृत्तस्येतितस्याअप्यानर्थक्येनमूलोच्छेदप्रसंगइतिकथमनर्थिकास्तु
तिःस्यात् यन्त्वर्थवादरहितंकेवलंविधिवाक्यंनत्रविधिरेवस्तुतिमाक्षिपतीतिनो
क्तदोषावतारः इहप्रसक्तश्रुतायांस्तुतौसत्यांकिमाक्षेपक्लेशेनेत्यलं एषचविचा
रःउत्तरत्रसर्वेष्वेवार्थवादेषुद्रष्टव्यइति अनृतवदननिमित्ताशुद्धिपरिहारेणोप
स्पर्शनस्यप्राशस्त्यमभिधायतत्साधनभूतानामपांस्वतःशुद्धत्वात् स्वसंबंधि
शुद्धिहेतुत्वाच्चतत्प्रशस्तमित्याह मेध्याआपइति इदानीमग्निदर्शनलक्षणेनांगां
तरेणसहितंसमंत्रकंव्रतोपायनंविधत्ते सोग्निमिति सयजमानःअग्निमाहवनी
यं मंत्रार्थस्तु हेव्रतस्यपालकाग्नेअनृतवदनत्यागादिरूपंव्रतंकरिष्यामि तत्क
र्तुंशक्तोभूयासं शक्नोतेर्लिङ्याशिष्ययम् मदीयंतद्व्रतंराध्यतांसमृद्धंभवत्विति
व्रतप्रतिपदंव्याकरोति अग्निर्वैदेवानामितिउत्तरभागस्यव्याख्यानेहेतुमाह ना
त्रेति तिरोहितमविस्पष्टार्थंपदं स्वीकृतस्यव्रतस्ययागसमाप्तिपर्यंततामाह अ
थेति संस्थितेयागेपर्यवसितेविसर्जनमंत्रमाह अग्नेव्रतपतेव्रतमचारिष
मिति अत्राशकमराधीतिपूर्वमंत्राद्वैलक्षण्यंतत्रहेतुमाह अशकद्धीति योय
तस्यपर्यवसानंप्राप्तवान्सएतत्कर्मकर्तुमशकत् शक्तोभूत् तस्मैतेनकर्मणाअ ४

राधिअसिद्धि तत्कर्मासि ध्यादित्यर्थः अग्नितिगमेर्लुङिमंत्रेषसेति च्लेर्लुकि
हल्ङ्याद्दिलोपे मोनोधातोरिति नत्वं व्रतोपायनेमंत्रांतरंविधातुंपूर्वमंत्रान्तस्यैववि
शेषमाह एतेनेति यत एतेनवक्ष्यमाणेनेदमहमित्यादिनाबहवोव्रतमुपयंति अतस्तु
हेतोरनेनैवोपेयात् एवकारेणैवमंत्रःप्रशस्यते नतुपूर्वोनिषिध्यते अतएवका
त्यायनोद्वयमप्याह अग्नेव्रतपत इदमहमितिवेति इदमहमितिमंत्रेकर्मत्वेनापा
दानत्वेनचसत्यानृतयोरुभयोरेवोपादानेकारणमाह द्वयंवाइति यदिदंजगत्स
र्वमनृतंसत्यंचेतिकोटिद्वयमेवनतृतीयाकोटिरस्ति सत्यमेवदेवाश्चिरावस्थाना
त् नियमेनसत्यवादित्वाद्वा अनृतंमनुष्याः स्वप्नदृष्टवदल्पकालावस्थानात् प्रायेणा
नृतवादित्वाद्वा तथादेवमनुष्याणांसत्यानृतवादित्वमैतरेयकेप्याम्नातं·सत्यसंहिता
वैदेवा अनृतसंहितामनुष्या इतिसत्यानृतवदनसाहित्यंहितत्रविवक्षितोर्थः तस्मा
द्दीक्षितेनसत्यमेववदितव्यमितिवाक्यशेषात् यदनेनमंत्रेणोच्यतेतन्मनुष्येभ्योदेवा
नुपैमीति सैवमात्मकं इममर्थमयंमंत्रआहेत्यर्थः अनेनमंत्रेणव्रतमुपेयुषोनियममा
ह सवाइति सइत्थंकृतव्रतोपायनः सत्यमेवेत्येवकारादनृतंनवदेदित्यर्थः अत्यैव
कारेयघसत्यंनचदवश्यंवक्तव्यंस्यात् ग्रहंसंमाष्टि इतिवदेकत्वस्याविवक्षितत्वात् अ

नृतवचनं चाप्रतिषिद्धं स्यात् इमसंसंमा छ्रुतिवदेकत्वस्य इष्यते च न तु निषेधः अत एव तै
त्तिरीयके दर्शपूर्णमासप्रकरणे समाम्नायते नस्यैतद्व्रतं नानृतं वदेदिति यद्यप्याहिता
ग्निमात्रस्यानृतवदनमन्यत्र प्रतिषिध्यते तस्मादाहिताग्निर्नानृतं वदेदिति तथाप्यनृ
तवदनवर्जनस्य दर्शपूर्णमासांगत्वसिद्धये पुनरिह वक्तव्यमेव इतरथा अनृतवदने
5 पि पुरुष एव प्रत्यवेयात् क्रतुः पुनरविगुण एव स्यात् यो नाम क्रतुमध्यस्थः कलंजादि
निभक्षयेत् न क्रतोस्तत्र वैगुण्यं यथाचोदितसिद्धिरिति न्यायात् ननु अनेनापि वचनेन
कथमनृतवदननिषेधस्य कर्मांगसिद्धिः वदेदिति प्रत्ययार्थस्य कर्तुः प्राधान्यात् तदर्थ
एवायं प्रतिषेध इति हि युक्तं कर्मप्रकरणात् कर्मांगतेति चेत् प्रतिषेध्यपाठादपि क्रिया
यास्तावत्कर्तृशेषता पदश्रुत्या प्रतीयते यदर्थं प्रतिषेध्यं तादर्थ्यमेव प्रतिषेधोपि चाभि
धीयत इति श्रौतेन पुरुषार्थत्वेन प्रबलेन प्राकरणिकी दर्शपूर्णमासार्थता बाध्यते न
नु न वदेदिति पदद्वयगम्यप्रतिषेधस्य कर्तुः संबंधः पदद्वयं च वाक्यमिति कथं प्रतिषेध
स्य कर्तृसंबंधः श्रौत इति चेन्न यथा ग्रहं संमार्ष्टीति पदद्वयगम्य संमार्गस्य ग्रहशेषता
तथापि द्वितीयया क्रियासामान्यं प्रति ग्रहस्य शेषत्वाभिधानात् तद्विशेषस्य संमार्गस्य
पदांतरेणोपस्थापनेपि न शेषशेषिभावस्य श्रौतत्वभंगस्तद्वत् अत इह पुरुषार्थो निषेधो
विधीयते स्मृत्यैव विहित इति चेत् तथापि हि तस्या एषैव श्रुतिर्मूलं भविष्यति द्वयोर ५

र्थसाम्यात् अतोयुक्तः श्रुत्याप्रकरबाधइति अथमतं अतिविरोधेदुर्बलंप्रबलेननि
राक्रियतेननुस्वयंप्रबलमिसेवदुर्बलहिंसान्याय्या नचेहप्रकृतक्रिययाकर्तृसंबंधेप्र
करणबाधः अतोनकेवलक्रत्वर्थतेति ननुपुरुषमात्रार्थोनृतनिषेधःस्मृत्यैवसिद्धः
सएवक्रतुगतपुरुषार्थोपिभविष्यतीतिकिमनेनविशेषनिषेधेन नचतस्याःस्मृतेरि
यंश्रुतिर्मूलमितियुक्तं सामान्यविशेषविषयतयामूलमूलिभावासंभवात् एवंतर्हिस
र्वविशेषगामिनासामान्येनस्मृतिसिद्धस्यनिषेधस्यप्रकरणाबाधायक्रतुगतपुरुष
विशेषेअनुवादोस्तु तस्यप्रत्ययार्थत्वेनप्राधान्यादित्युक्तंस्यादेवयदिकर्तुःप्रत्ययार्थत्वं
स्यात् नत्वेतदस्तिअन्यलभ्यस्यैवशब्दार्थत्वात् अवश्याभिधातव्ययाभावनयैवाक्षेपा
त्कर्तुःप्रतीतेः नचलःकर्मणिचेतिस्मृतिबलात्कर्तुःप्रत्ययार्थतात्वस्याःस्मृतेर्द्व्येक
योरित्यनेनैकवाक्यत्वात्प्रत्ययाभिधेयत्वेनोच्यमानयोर्द्वित्वैकत्वयोर्व्यावर्त्तकत्वेनैव
कर्तुःसमर्पणात् कर्तृद्वित्वेद्विवचनंकर्त्रैकत्वेएकवचनमिति अतोभावनयासंख्यया
वाक्षेपादेवकर्तुःप्रतीतिःसिद्धेतिनप्रधानतयाप्रत्ययार्थः अतःक्रियायाएवप्राधान्या
त्तस्यामेवांगत्वेनानृतनिषेधोविधियतेनचस्मृत्यापुरुषार्थतयाविहितस्यअनृतवद
ननिषेधस्यकथमिहप्रकरणात्क्रत्वर्थतेतिवाच्यंखादिरोयूपोभवतिखादिरंवीर्यकाम
स्येतिवत्संयोगपृथक्त्वेनोभयार्थत्वसिद्धेः उक्तंहिएकस्यतूभयत्वेसंयोगपृथक्त्वमिति

अतः सत्यमेव वदेदिति दर्शपूर्णमासांगत्वेनानृतप्रतिषेधस्य विधिरयमिति सिद्धं त
दाह कात्यायनः इदमहमितिवा सत्यवाद्यनृतः कर्मांगमनृते सत्यवदनमिति तस्मान्नेय
शाइतियज्ञाश्विनां देवानां यज्ञोपि यज्ञाः प्रतिपादनायय शास्त्वेन रूपकं अग्नेव्रतपतर
तिमंत्रवदिदमहमिति क्रियाविशेषणत्वान्नपुंसकं मंत्रेणाभ्युपेतस्य व्रतस्य प्रसंगाद्वि
सर्जनमाह अथ संस्थित इति अत्र तु विसर्जनमंत्रस्यायमर्थः व्रतोपायनात्प्रागहं य
एव मनुष्योस्मि व्रतं मुक्त्वा स एव मनुष्य इदमस्मि ननु व्रतसमय इव देवः इदमिति क्रि
याविशेषणत्वान्नपुंसकत्वं न च सो मनुष्यो व्रतसमयेपि मनुष्य एव न तत्किमुच्यते य ए
व मनुष्योस्मि स एवेदमस्मीति तत्राह अमानुष इवेति मानुषोपि हि तदा अन्यालकत्वा
त्सत्यवदनाद्धा देव इवेत्युक्तं व्रतत्यागे तु कृते व्रतारंभात्प्राग्वत्स्वभावसिद्धं मनुष्यत्वमेवेति
ननु यथा व्रतोपायने अनृतात्सत्यमुपैमीत्युक्तं एवं तत्यागे सत्यादनृतमुपैमीति किं नो
क्तमिति तत्राह नहीति महता कर्षाद्दिवत्वात्प्रच्युतेनात्यंतनिकृष्टमानुषत्वप्राप्तिकथ
नस्य परुषत्वादकथनं तदाह नदु खल्विति व्रतप्रसंगादागतं तद्विसर्जनं समाप्य पूर्वे
द्युर्यजमानेन व्रतानंतरं यत्कर्तव्यं तद्वक्तुं प्रतिजानीते अथात इति यतो व्रतानंतरम
शनानशनापरनामकर्मारण्याद्यशनमेव यजमानेन कर्तव्यं अतस्तदनंतरमेव त
स्य निरूपणं क्रियत इत्यर्थः प्रतिज्ञातस्याशनानशनपक्षस्य प्रशंसार्थं केवलानशना

नपक्षंनिरसितुमुपन्यस्यति॥ तदुहेति॥ तन्तस्मिन्नशनानशनविषयेसवयसःपु
त्रोषाढनामकःसर्वालनाअशनस्यागमेवव्रतंमेनेतथामन्यमानस्याषाढस्याशप
माहमनोहेत्यादि अनुपन्यस्तमपिमनुष्यस्यमनआसमंताज्ज्ञानंतिअतोयोसौ
यजमानोव्रतमुपैतिएषनःप्रातरवस्यंपक्षनीतिज्ञात्वातेविश्वेसर्वे तेदेवाव्रत
दिवसेयजमानस्यगृहानागच्छंतिउपवसथनामनिर्वचनेनदेवानामागमनंद्र
ढयतितेस्येति उपसमीपेयजमानस्यवसं[illegible]तिदेवाअस्मिन्नितिपूर्वदिवसउपव
थनामकइत्यर्थः अस्तुकिंततइतिचेत् गृहेमनुष्येष्विति तेष्वनश्नत्सुयःकश्चि
द्यजमानःस्वयंपूर्वंभुंजीतेतियत्तदेवानुचितमितिवितर्कयामःअथयःकश्चिद्दे
ष्वनश्नत्सुपूर्वोश्नीयादितिय~त्तस्यानवक्लृप्तिःकिमुवक्तव्या केमुतिकन्यायफलमा
ह तस्माद्धिति उइत्यसंदेहे अशनवर्जनलक्षनार्थेनास्तिसंदेहइत्यर्थः आषाढेनचे
न्मुनिनानिर्णतोनशनपक्षः तर्हिसएवपरमार्थःकथमशनानशनपक्षइतिचेत्
अस्यापिमुनिनैवयाज्ञवल्क्येनसोपपत्तिकंनिर्णतोनेदित्याह तदुहेति तदुतस्मि
न्नप्यशनानशनपक्षेयाज्ञवल्क्यउपपत्तिमुवाचह अशनानशनलक्षणस्यमतस्मम
र्थनायप्रसेकपक्षोदूषयति यदीति दैविकेहिकर्मणिदेवान्प्रत्युद्दिश्यस्यैवहविषःप्र
थममनुपयोगःकामममन्यस्य पित्रेपुनरितिनियमाद्धविषोन्यदप्यनुपयोज्यमितिपि

पितृदेवसत्तामापादयतो याज्ञवल्क्यस्याशयः नत्किं दैविके कर्मणि प्रागपि भोक्तव्यमि
ति यस्तमाशयमजानानः शंकते तं प्रत्याह यद्युरिति यद्युयद्दित्वश्नाति तदा अशिशि
षतो देवानतिक्रम्य स्वयं भुक्तवान्स्यात् अशनानशनपक्षयोरुभयोरपि दोष
श्चेत्यागतिरिति तत्राह सयदिति यद्द्रव्यमशितमपि अनशितवद्भवति तद
श्नीयात् किं तदिति तदाह यस्येति यस्य द्रव्यस्य संबंध्यन्नं हविर्देवा न गृह्णंति तदशि
तमपि सदनशितवद्भवति तथात्वे यथोदीरित दोषद्वयाभावमाह सयदिति अश
नादेवनपितृदेवनात्वं अश्यमानस्य देवायोग्यत्वाद्देवन देवानामतिक्रमः अथ किं
तादृग्द्रव्यमिति तदाह स वा इति आरण्यग्रहणं प्रकृतदर्शपूर्णमासहविर्व्यतिरिक्तो
पलक्षणं रक्ष्यं रक्षोद्भवं फलं भुक्तोपलक्षणत्वेन तु मुनिविशेषव्यवहारं प्रमाणयति
तदुहेति वृषानाम कश्चित्तस्य पुत्रो वार्ष्णः तस्य नाम बर्कुरिति मुनेर्मतमपवदति
नदु तथेति तत्र हेतुः व्रीहियवयोरिति शमीधान्यं तिलमाषादि उपचिनोतीस्फ
पचं अल्पेनापि हिमाषपिष्टेन मिश्रितं व्रीहिपिष्टं त्रिचतुरान्यामान्स्थापितमुपचि
तं बर्कु भवतीति प्रसिद्धं तदाह व्रीहियवाविति अतो माषोपयोगे व्रीहियवावेव यत्तु उ
पयुक्तौ स्यातां अतस्तथा न कुर्यात् अतो यदुक्तमारण्यमेवाश्नीयादिति तद्देवव्यवस्थि
तं सकृदशनं तां रात्रिमाहवनीयागारे गार्हपत्यागारे वा शयीत तत्रैव शयने हेतुः ८

देवान्वाइति उपावर्त्तनेसमीपे सेवते अधःखादीत नपुनः खड्गादेरूपरि यत्तदुपरिस्थितं
श्रेयांसं अध एव स्थिता उपचरंति अथप्रभातेध्वर्योः कर्तव्यमाह सवाइति सप्रसिद्धो
ध्वर्युः प्रथमेनकर्मणा अप एवाभिमुख्येन प्राप्नोति किं तस्य प्रथमं कर्म तदाह अपःप्रणय
तीति एतत्त्वापां प्रणयनमथ संयौतीतिवक्ष्यमाणसंयवनार्थं अतः संयवनात्प्राक् प्रणी
तानां नाशे पुनः प्रणयनं कर्तव्यं कृते तु संयवने तन्नाशेपि प्रयोजनस्य जातत्वान्न पुनः प्रणे
तव्यं नन्वंतर्वेदि प्रणीतानि नयनीस्फ्य परि तननिनयनार्थं पुनः कस्मान्न प्रणयनमिति चे
त् न संयवनप्रयुक्तानामेवापां प्रतिपत्तिमात्रं अतो तत्तपां प्रणयनस्य प्रयोजकं नहि
चात्वाले प्रासनं कृष्णविषाणां प्रयुंक्ते अथोभयं साधयतः प्रणयनस्य कथं संयवनमेव प्र
योजनं न त्वंतर्वेदि निनयनमिति चेत् पूर्णपात्रं निनयतीति द्वितीयया अपां संस्कार्यकर्मत्व
प्रतीतेर्निनयनस्योपयुक्तसंस्कारतया प्रासनवत्प्रतिपत्तित्वात् संयवने तु समान प्रकरणे शा
ख्यांतरे प्रणीताभिर्हवींषि संयौतीति तृतीयया अपां संयवनं प्रतिगुणत्व प्रतीतेः अतः संय
वनार्थमेव प्रणयनं उक्तं प्रणयनं प्रशंसति यज्ञो वा इति अपां यज्ञसाधनतया यज्ञरूपत्वा
त् न द्विस्तारात्मकस्य प्रणयनस्य यज्ञविस्ताररूपत्वात् प्राशस्त्यं उक्तं प्रणयनमनूद्य तस्य
च कस्त्वेति व्याहृतिचतुष्टयात्मकं मंत्रं विधत्ते सप्रणयतीति हे प्रणीतोदक को नाम त्वां यज्ञे
न सह युनक्ति योक्तुं समर्थः ये समर्थः स त्वा युनक्ति कस्मै वा प्रयोजनाय युनक्ति यस्मै युनक्ति

तस्मैपुनक्तियोजनेकर्त्ताप्रयोजनंवादुर्ज्ञानमित्यर्थः व्याहृयंतइतिव्याहृतयोमंत्राः
दुर्ज्ञानत्वाभिधानाच्चनिश्वासअवचनादनिरुक्ताः व्याहृतिविशेषणस्यानिरुक्तत्वस्यप्र
योजनमाह अनिरुक्तोवाइति अनिर्ज्ञातोहिपदार्थः कइतिपर्यनुयुज्यते अतोसावनिरु
8 क्तः प्रजापतिश्चकइत्युच्यते कोहवैनामप्रजापतिरितिश्रुतेः अतःश्रुतिसाम्यात्प्रजा
पतेरनिरुक्तत्वं अथवावाचकमंत्रोच्चारणमंतरेणमनसैवध्यात्वाप्रजापतेर्होमादपिप्रजा
पतिरनिरुक्तः स्यात् यत्तूष्णींतत्प्राजापत्यंसमनसाजुहोतिमनइवहिप्रजापतिरिति
श्रुतेः सत्वनिरुक्तः प्रजापतिः प्रस्तुतेकिमायातमित्यत्राह प्रजापतिर्यज्ञइतिप्रजा
पतिर्यज्ञानसृजनेतियज्ञस्रष्टृत्वश्रुतेः कार्यस्यकरणाभेदात् तथाएषवैसप्तदशःप्रजा
पतिर्यज्ञमन्वायत्तइतिसप्तदशाइतिसमुदायात्मकस्यप्रजापतेः सकलयज्ञानुगमश्रुतेः
अनुगछतश्चसामान्यादेर्लोकेनपृथक्अनुगंतव्यः व्यक्तावभिमानदर्शनात् यस्मात्प्र
जापतिर्यज्ञः अतोअनिरुक्ताभिर्व्याहृतिभिः प्रणयनादनिरुक्तप्रजापत्यात्मकतयाअनिरु
क्तंयज्ञमेवपुनक्तिप्रारभतइत्यर्थः प्रशब्दोपात्तप्रकर्षसूचितप्राथम्यस्याप्रणयनंप्रागस्ता
वीयज्ञोवाइतितत्त्वनयतिपदोपात्तप्रापणात्मकविस्तारद्वारतइति अथापइत्यस्याव
यवार्थपर्यालोचनयापिद्वैधास्तीति यद्देवेति अनियोगेएवकारः ननियोगेनप्रागुक्त
रीत्येवस्तुतिः किंत्वेवमप्यस्तीत्यर्थः आप्नुवंतिसकलंजगदित्यापःतासांनामधेयप्रणय ८

नात्प्रथमैमेवसर्वआप्नंस्यादित्यपिप्रशस्तंतत्प्रणयनमित्यर्थः अथवास्यकर्मणोयद्दे
वांगंप्रापयितव्यमध्वर्य्वादयःप्रमादान्नप्रापयंतितद्वैकल्पमुदकप्रोक्षणाचमनादिना
परिहरंतःआपयंतिअतोप्याप इतितत्प्रणयनंप्रशस्तंनकेवलमवयवार्थपर्यालोच
नया उदकप्रभावपर्यालोचयापिप्राशस्त्यंवक्तुमारभते देवान्हेति असुराश्चरक्षांसिच
असुररक्षसानिअनसंतान्नपुंसकाच्छंदसीत्संततत्वात्समासांतः नयक्षध्व इतियष्टुं
नलभध्वेयूयमितिवदंतोररक्षुः प्रतिबबंधुरित्यर्थः इत्थंप्रतिबद्धादेवाएतमब्रूक्षणं
वज्रंददृशुः अपांवज्रत्वेताएताआपोवज्रीभूत्वेत्यादिश्रुत्यंतरप्रसिद्धिमाह वज्रोवा
इति नकेवलंप्रसिद्धिबलाद्वज्रत्वंउपपत्तिबलाच्चेत्याह वज्रोहीतिउपपत्तेःप्रसिद्धिंवि
राद्धआह तांप्रसिद्धामुपपत्तिंदर्शयति तस्मादिति यस्मादापोवज्रंतस्मादेताआपोयेन
यथागच्छंतितंपंथानंनिम्नंगंतुंकुर्वंति गत्वावायत्रतृणगुल्मादावुपतिष्ठंतेतत्निर्दहंति
निःसारंकुर्वंतितेदेवाएतमब्रूक्षणंवज्रमुद्यच्छन्युक्तप्रकारप्रणयनात्मकमुद्यमनंतस्य
कृतवंतइत्यर्थःतस्यवज्रस्यसंबंधिनिभयेतेनवज्रेणपरिहृतअभयेअनाष्ट्रेनाशयंतीतिना
ष्ट्राण्यसुररक्षसानिरहितेनिवातेनसंसृष्टेनवातेनापिरहितेस्थानेयथादेवाःकृतवं
तः तथैवैषोध्वर्युःप्रणयनप्रकारमाह ताउसिंच्येति चमसादिपात्रस्योपरिसिक्त्वापूरयि
त्वा नपुनस्तेनपात्रेणकृतत्विज्जलाशयादुध्धृत्यगार्हपत्यस्योत्तरभागेस्थापयेत् आ

पस्तंबसूत्रस्थापितस्यपात्रस्यसमंत्रकंपूरणमाह इहतुब्राह्मणेपूरितस्यस्थापनं अतस्तथै
वोक्तंकात्यायनेन गार्हपत्यस्योत्तरेणोदपात्रंनिधायेतिअवरूपंप्राङ्ङितव्यावामपांकिंगार्ह
पत्यस्योत्तरदेशेस्थापनेनेत्याशंक्यतत्प्रयोजनकथनेनस्तौतियोषावाइतिअप्शब्दस्य
९ स्त्रीलिंगत्वात् वृषेति अग्निशब्दस्यपुल्लिंगत्वात् गृहपतिनासंयुक्तेभ्यइत्यग्निविशेषो
गार्हपत्यः तद्वावासइहलक्षणयागार्हपत्यउच्यतेअतएवतस्यगृहत्वमुक्तं गृहावैगार्ह
पत्यइति उदपात्रस्थापनंप्रयोजनांतरेणस्तौति वज्रोवाइति अप्रतिष्ठितःअसंबद्धःस
हैनमिति तमेनमशक्तंअनुषंतारं संश्टणातिहिनस्ति श्टहिंसायांप्वादीनांदीनांह्रस्वः
अतोहिंसापरिहारायस्वयंसन्नद्धएवोपतिष्ठेत् उषंतुःप्रतिष्ठामुक्त्वाउषंतव्यस्यापिप्रति
ष्ठामाह सयदिति गृहावैप्रतिष्ठेति कोणेस्थापितस्यासेरिववातादिस्पर्शविरहात्तैक्ष्ण्यस्या
विनाशोवज्रस्यप्रतिष्ठा इत्थंतीक्ष्णीभूतःसवज्रःस्वप्रयोक्तुरभिमतफलनिष्पादनात्त
द्विरहदुःखासिकांहिंसामस्यनकरोतीत्याहनत्थोहेति गार्हपत्योपश्लिष्टेतदुत्तरभागेवर्ते
गावःसुशेरतइतिवदौपश्लेषिकाधिकरणेसप्तमी सादितानामपांप्रणयनमाह ताइति
आहवनीयस्यसंनिहितोत्तरभागेप्रणयतिनीत्वासादयति एनवन्यतरस्यामदूरेपंचम्या
इत्येनप् येनपाद्वितीयेतिषष्ठ्यर्थेद्वितीया अपामग्नेश्चमिथुनत्वामुपपादयति एवमेवेति
तानांतरेणेति अंतरेणेतिबलादग्निमितिलभ्यते तासामग्नेश्चमध्येनसंचरेयुरित्यर्थः २

तत्र कारणमाह नेदिति नेदिति परिभये अथापि नेसेष इदि से तेन संप्रयुज्यते परिभये

इति हि निरुक्तं संचारे हि चर्यमाणं मिथुनमंतरेण परस्परं संगतयोः स्त्रीपुंसयोर्मध्ये सं

चारान्मिथुनविच्छेद लक्षणा भीतिः संचरान् संचरेयुरिति हेतु हेतुमद्भाव रूपे लिङर्थे ले

ट् झेरन् तादेशः इतश्च लोपः इतीकारलोपे संयोगांत लोपः तस्यासिद्धत्वात् नलोपाभा

वः स्वक्षादुत्तरभागे आसादने प्रणयनं विवक्षितमिति दर्शयितुं ततः प्राक् प्रसंग्भागासा

दनं निषेधति तानातिहृत्येति अतिहृत्य उत्तरभागमतीत्य प्राग्भागे अनासाः उत्तरभा

गमप्राप्ताः प्रसंगेवनासादयेत् तदतिहरणपक्षमनुवदति सयदिति तत्र दोषं वक्तुमु

पोद्घातमाह अस्ति वा इति व्यन्तसपत्न इति स्मृतेर्भ्रातृव्यः शत्रुः तस्य भ्रातृव्यं शात्रवं यु

वादित्वाद्भावे अण् विशिष्टं भ्रातृव्यं अग्नेः अपां च परस्परविनाशकत्वान्महदस्ति वैर

मित्यर्थः अस्तु किं ततः इत्याह स यथेति तदद्भिः सह महद्वैरमग्नेर्यथा भवति स्वकार्य

निर्वापणरूपमुपद्रवं कर्तुं प्रभवति तथा सोतिहरन्नध्वर्युः कुर्यादित्यर्थः तथाकरणे का

हानिः तत्राह यत्रेति यत्र कर्मण्यस्य प्रणयनपात्रस्य संबंधिनीरप उपस्पृशंत्यृत्विग्यज

मानः तत्र उपस्पर्शनमग्नेर्भ्रातृव्यं शत्रुमुद्दलक्षणं वर्द्धयेदुत्तेजयेत् अतिहरणस्य

वैरकुरणसंबंधार्थः प्रथमोनुवादः चरमस्तु भ्रातृव्यवर्धनसमर्थनार्थ इत्यपौनरुक्त्यं

अतिहरणपक्षे दोषउक्तः अनाप्निपक्षे दोषमाह यद्यु इति स्वसमये प्राप्तत्वात्ता सामयां

कामप्रापकत्वं दूरापास्तमित्यर्थः इत्थमुपोद्घातमुक्त्वाओपोद्घातिकमाह तस्मादिति संप्रसे
वसत्यपगुत्तरभोग एव न पुरतो न पश्चात् अतत्कं कात्यायनेन उत्तरेणावनीयत् संप्रति
निदधातीति प्रणीताप्रणयनानंतरं परिस्तरणं पात्रासादनं चाह अथतृणेरिति द्वंद्वं द्वे
द्वे इत्यर्थे द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु इति निपातितं पात्र
पदं यज्ञनिर्वर्तकानां स्प्यादीनामुपलक्षणं अर्थतः प्राप्तां संख्यामनूद्य प्रशंसति त
द्दशेति तस्मिन्प्रयोगे एवं परिगणने कृते दश संपद्यंते विराजश्छंदसोऽक्षरेषु दशत्व
मस्ति प्रथमश्च यज्ञो ज्योतिष्टोमः एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति
श्रुतेः तत्र च नवसुत्तरत्वातसंख्याकाः स्तोत्रियाः तासु एकोनविंशतिसंख्यया विभज्य
मानासु दशालभ्यं तद्दशसस्ति तत्रापि दशासंख्या अतो दशसंख्यायोगाद्विराड्यज्ञयोरेक
त्वादिह दशसंख्यासंपत्त्या विराडात्मको यज्ञ एव संकल्पेन संपादितो भवति एवं दशत्वं
स्तुत्वा द्विशः प्रयोगमनूद्य स्तौति अथ यदिति संरभेते रभ राभस्ये राभस्यं कार्योपक्रमः
किमपि कार्यं कर्तुमुपक्रमेते   इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यंदिनशतपथभाष्ये प्रथमाध्याये प्रथमं ब्राह्मणं १ पात्रासादनानंतरं कर्तव्यमा
माह अथ शूर्पमिति एतच्चादानं हविर्निर्वापार्थं वामिति मंत्रगतद्विवचनलिंगादुभौ
सहादीयेते अत एव सूत्रे शूर्पाग्निहोत्रहवण्यावादयेतीतरेतरयोगद्वंद्वः यज्ञो वा

इत्यादि यत्नायपहितदादानं अतः कर्मशब्दः कर्ममात्रपरोपितद्विशेषं यत्नमेवब्रूते इज्य
तेऽनेनेतियज्ञोह विस्तदिह निर्वापकाले व्रीहिरूपं तदग्निहोत्रहवण्याश्शूर्पे निर्वपन्
वेवेष्टीवपरिवेषणं करोतीव यथान्नं दर्व्या भोजनपात्रेऽतो वेषायवामिसुक्तं वेवे
ष्टीसत्रपरिरूपसर्गेऽलुप्तनिर्दिष्टः विष्णुव्याप्तौ निजां त्रयाणां गुणः श्लाविसत्व्यासस्य
गुणः अथशूर्पमित्यादिष्वथशब्दा अनुष्ठेयपदार्थपौर्वापर्यलक्षणं क्रममाहुः अत
स्तद्विशिष्टाः पदार्था विधीयंते ननु वैतसलक्षणः क्रमः सर्वेषु पदार्थेष्वेक एव नैके
कपदार्थगत इति तद्विशेषणतया तद्विधिभिः कथं विधातुं शक्यते तर्हि संघातविशे
षणतया तद्विधिनैव विधीयतामिति चेत् न संघातस्याविधेयत्वात्तस्य चैकत्वेननि
यमे नानेकपदार्थाश्रितस्य क्रमस्यासंभवात् नैदोषः यथा संयोगादय एकैकत्र वस्तु
न्यपर्यवसिता अपि वस्त्वंतरमपक्ष्यैकत्रापि पर्यवस्यंतः तद्विशेषणतया तद्विधिभिः
कथं विधातुं विधीयंते तद्वत्क्रमोपि किं न विधीयते न च शब्देनानभिधानादविधान
मिति मंतव्यं प्राकृतोपकारवदनभिहितस्यापि वैतसलक्षणस्य क्रमस्यार्थाद्बुद्धावुपस्थि
तस्य विधिसंभवात् न चावैरूप्यं वैतसलक्षण एव क्रमः अस्ति ह्यसावानुपूर्व्यलक्षणो
पि तथा च यथाध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीति क्त्वा प्रत्ययेनाभिहितः
पौर्वापर्यलक्षणः क्रमो भावार्थविशेषणतया विधीयते एवमत्राप्यथशब्देनाभिहितो वि

धीयत इति किमनुपपन्नं तदुक्तं जैमिनिना श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वादिति
वाग्वेयत्त इति यच्च निपदसंनिधानान्नियम्यमानैवेह वाग्विवक्षिता तस्याश्च यत्नसा
धनत्वात्तेयं साधनतामुपपादयति अविक्षुब्ध इति वाङ्नियमे हि चित्तविक्षोभहेतोर्वा
ग्व्यवहारस्याभावात्तदेकाग्र्येण सविकल्पो यत्नोपयत्नः संपद्यते क्षुभेरुदात्तोपदेशत्वे व्या
गमानुशासनस्यानित्यत्वादिड्भावः क्षुब्धस्वांतेति मंथेति निपातितं अथ प्रतपतीति
शूर्पं चाग्निहोत्रहवणीं चेत्यनुषंगात्तदुभयमित्यर्थः निष्टप्ता अरातय इति वेति व्रीहि
भिर्यजेतेत्यत्र व्रीह्यनुष्ठानपक्षे यववाक्यस्य प्राप्तप्रामाण्यस्य त्यागः अप्राप्ताप्रामाण्यस्वी
कारश्च पुनर्यवानुष्ठाने स्वीकृताप्रामाण्यस्य त्यागः त्यक्तप्रामाण्यस्वीकारश्चेति चत्वा
रो दोषाः इत्थं व्रीहिवाक्येपि न्वचार इत्यष्टौ दोषा यद्यपि तथापि गत्यभावाद्विकल्प इत्यु
क्तं भट्टाचार्यैः एवमेषोष्टदोषोपि यद्व्रीहियववाक्ययोः विकल्प आश्रितस्तत्र गतिरन्या
न विद्यत इति इह पुनर्वाक्यशेषेनाधस्तादप्यनुकृष्टेन मंत्रद्वयपाक्षिकत्वस्य श्रुत्यैवाभि
धानान्नैकोपि दोषः एतदर्थमेव च एकार्थास्तु विकल्पेरन्निति व्रीहियववदेव न्यायप्राप्त
स्यापि विकल्पस्य वेति स्ववाक्येनोपादानं मंत्रकरणकतायै साध्यस्य निरासस्योपयोगसि
द्ध्ये निरसनीयानां प्रसक्तिमाह देवाहवा इति असुरैः रक्षसेभ्य इति षष्ठ्यर्थे चतुर्थी तेषामा
संगात्संसर्गाद्भीताः बिभेतेर्लिटि भीह्रीभृहुवामित्याम् प्रत्ययः श्लुभावश्च नाशयंती

तिनाष्टा आसुर्यः प्रजाः ताश्च रक्षांसि तत्तेन तपतेन अतो यज्ञमुखात् यज्ञप्रारंभादपहंति
एतदिति क्रियाविशेषणं अथ प्रेतीति स्फ्यं संप्रतपनानंतरं गृह्णीतिमंत्रेणाहविनिर्वापार्थं शा
कटसमीपं प्रेति प्रगच्छेत् मंत्रप्रयोजनमाह अंतरिक्षं वा इति यथा रक्षो मूलैः पृथिवीम
नुप्रविष्टः तिष्टत्येव न गच्छति यथा वा व्याघ्रादिरभितः पाशाभ्यां बध्यमानो म्रियमाणः नैवं पुरु
षो मूलवान् नाप्युभयतः केनचित्संसर्गिणा प्रतिबद्धः किंतु परिच्छिन्नः प्रतिबंधकासं
स्पृष्टः सन्नंतरिक्षे विस्रंभं चरति तथैव निवप्स्यमानहविरादानार्थं रक्षोवत्विशेषविशिष्टं
सत्वं निवप्स्यंतं पुरुषमनुगच्छेत् अनस्तदेतत्पुरुषेण गम्यमानमंतरिक्षप्रदेशं ब्रह्मणा उर्वि
सनेनैव मंत्रेण अनाष्टं हिंसकरहितं अत एव भयं कुरु तेउरुविस्तीर्णं प्रतिबंधकरक्षोल
क्षणमूर्तद्रव्यविरहादिति मंत्रार्थः अनस एव सकाशात् ग्रहणे कारणमाह अतो ह वा इ
ति अन एव हि प्रथमं धान्यस्याधिकरणं अनसः सकाशान्नीयमानं धान्यं पश्चेव पश्चादे
व किंतनूयच्छालं शालाभिगतं भवति पश्चपश्चा च छंदसीति निपातितं शालाशब्दाच्छां
दसत्वेन छस्याविकल्पितत्वादणू यदग्ने गृहप्रवेशात्प्रागनसि स्थितं अत एव गृहिणा मा शा
या अनुपहतं तदेव यज्ञसाधनं करवाणीति योग्यत्वे हेतुः तस्मादनसः एव सकाशात्सोध्व
र्युर्गृह्णीयात् न शालातः अथानसोप्यग्नेर खलादानीयमानमूतनस्थमेव किन्निरूप्यतरस
त आह भूमा वा इति मूलस्थं सत्यं ततो निरूप्यमाणं हविर्हिंसितं भिक्षावद्देवानतु गृह्णीयुरपि
स्मर्यते हि आत्मानं पीडयित्वा तु भिक्षां यः संप्रयच्छति सा भिक्षा हिंसिता ज्ञेया न साग्ना सा

कदाचनेति बहोभावोभूमा भवितरिभावोपचारेतिन्यायार्थः भूतिर्भूतं आलभ्य
मेवायंप्रमानितिवित् अतोबहुतरंभूतादनइत्यर्थः तस्यतथात्वे लोकप्रसिद्धिमा
हभूमाहीति प्रसिद्धिंलोकव्यवहारेणसाधयति तस्मादिति अतोवाय्वंअतसावोक्रमहेति
दित्यादिनदेतदनः स्त्रंह विरूपयष्ठभूयिष्ठमेवोपैतिअतोहिंसितभिक्षारांकानिराकृता
अतसएवग्रहणेहेत्वंतरमाह यज्ञोवाअतइति यज्ञसाधनत्वादतसिसाधनेस्तुसैयज्ञ
त्वोपचारः इज्यतेनेनेतिकरणएवकानङ्प्रत्ययः वैशाब्दः तस्यविधिश्रुतिसिद्धांयज्ञ
साधनतांस्तोतुंस्मारयति नकेवलंश्रुतिसिद्धंतस्यतसाधनत्वंप्रत्यक्षादिप्रमाणैरपित
स्यसाधनत्वंसिद्धमित्याह यज्ञोहीति अतसोत्साधारण्येहेत्वंतरमाह तस्मादिति यस्मा
दतसएवग्रहणंतस्माद्ग्रहणमंत्रा धूरस्यकुतमसिहविर्धानमित्यादयः अतोवयवलिंगा
दयंतेनपुनः कोष्ठगतस्यकुंभीगस्यवाधान्यस्यकुंभीत्यादिस्तन्निष्ठं धान्यंलक्षयतिमंत्राः
कोशंतीतिवल्लुप्तनिर्दिष्टाषष्ठी ऋषिमतमाह भस्त्रायाइति षष्ठ्यर्थेचतुर्थीतस्मिन्पक्षेभ
स्त्रायाः केमंत्राइत्यतआह तदृषीनितिइत्यर्थे तदातुतान्येवयजूंषिभस्त्रायाः प्रतिपा
दकानिस्युरित्यर्थः अतः पक्षेहिहेअतस्त्वंधूरसित्वमकुतंअकुटिलंहविर्धानमसीति भस्त्रा
पक्षेतुहेभस्त्रेइत्येवविशेषः मंत्रदाढ्यरवकस्मात्तान्येवअन्यानिकानिचित् भस्त्रायाः किंनवि
धीयंतइत्यतआह तान्यतहीति तैरेवयजुर्भिर्ग्रहणेयानियजूंषिप्रकृतावनस्यासन्तान्ये
वैवंसतिविकृतौभस्त्रायांअपिस्युः तथात्वेकिंफलमितिचेत्तत्राह यज्ञादिति यज्ञसाधनम १२

नन्वाग्निस्ससस्रुक्स्रयुज्यत इत्युक्तेव यज्ञं भस्मादिकं निर्ममे अनुतिष्ठानि हे सेवमनुष्ठानुराद्या
पद इत्यर्थः ननु प्रकृतावेव पक्षांतरं भस्मानन्तु विकृतौ यथा यवाः तत्किमुच्यते प्राकृतानीति स
संस्कारतमुपदिश्यमानं यथा प्रथमं वैकृतं तत्र तिदेशाच्चरमं प्रतीयते एवं स्वशब्देनाभिधाना
त् प्रथममप्रतिपत्तेरनः प्राकृतमुच्यते तल्लक्षितापूर्वसाधनतानुपश्चात् प्रतीतेर्भस्मावि
कृतिवद्विकृतिः अतो भस्मायामपि यववदुपदेशादेव धर्मसंबंधो नातिदेशात् व्रीहीनव
हंतीति पूर्वस्य प्रकृतिद्रव्यमवहंतीति यथा तथा नः पदेनापि भस्मादि परिग्रह इति पा
त्रीतो ग्रहणे धर्मविशेषमाह उतोइ ति उतोपि तु यदि पात्र्या गृह्णीयात् तदा धूरीषाद्य
भावेन तदनुष्ठानविरहादनुष्ठानकृतं व्यवधानमंतरायमंतरेण तस्मकाशाक यजूंषि धू
रसि देवानामसीत्यादीनि जपेत् नत्रैव धर्मांतरमाह स्फ्यमुत्तर इति तर्हि तस्मिन्पात्रीप
क्षे तस्या अधस्तात् स्फ्यमुपनिधाय गृह्णीयात् यदाह कात्यायनः पात्र्यां वा स्फ्योपहिता
यां धुरीषारोहणानि पात्रीबिले जपतीति अनसो ग्रहणादपि स्फ्योपहितपात्रीतो ग्रहणे
निश्चयितं प्रयोजनमाह यतो युनजामेति यमेव स्फ्यमाश्रित्य युनजाम यज्ञेन योगं प्राप्त
वाम तस्मिन्नेव स्फ्य विमुंचाम वियोगमपि करवाम योगवियोगयोः सामानाधिकरण्यसिद्धिः
स्फ्योपहितपात्रीतो ग्रहणपक्षे अनः पश्चादनित्य इत्यर्थः अयमत्राभिप्रायः अनसो नि
र्वापपक्षे हि जुहूपभृतो ताकरस्य पुरो निर्दिष्टात् पात्रीतः पुनर्निर्वापेन तदाधारभूते स्फ्ये तयो
र्निधानं विमोकः तदुक्तं कात्यायनेन घृताचीइति धुरि निदधास नसिंचेद्ग्रहणं स्फ्यपात्र्यां

वेदिति तथा अपां प्रणयनं च स्फ्येन सहेत्युक्तमापस्तंबेन स्फ्येनोपसंगृह्यावधिं च न्हरती
ति एनं च स्फ्येनैव योगः स्फ्य एव वियोगात्मको विमोकोपीति पात्रीतो ग्रहणे योगवियोग
योः सामानाधिकरण्यलाभो नेति न्याय इति अथो भयोर्वैयधिकरण्यात्सामानाधिकरण्योक्ता
ति न्याय इत्यासांक्य लोकप्रसिध्यनुसरणमति न्याय इत्याह यतो ह्येवेति सार्वविभक्तिकस्त
सिः यत्रैव योगस्तत्रैव विमोको न्याय्यः न हि करणे युक्तः कुड्यां विमुच्यत इत्यर्थः अथ धु
रः समंत्रकमभिमर्शनं विधास्यंस्तदुपोद्घातत्वेन देवतारूपतां तस्याः प्रतिपादयति तस्ये
त्यादिना अग्निरेव धूरिति यद्धुरोग्न्यात्मकत्वं प्रतिज्ञातं तस्योपपादनं अग्निर्हि वा इत्यादि
अनसो या धूर्बलीवर्दवहनस्थानं तस्याग्न्यात्मकत्वमन्वयव्यतिरेकाभ्यां लोकप्रसिद्धमि
ति हि शब्दार्थः तामेव प्रसिद्धिं दर्शयति अथ य एनदिति एतद्धुराख्यमनसोंगं ये खलु ब
लिवर्दा वहंति एषां वहं वहनसाधनं स्कंधरूपमंगं अग्निदग्धमिव दृश्यते अतो नूनं सो
ढव्या धूरग्न्यात्मिकेत्यवसीयत इत्यर्थः शकटान्निर्वापस्य प्राशस्त्यातिशयं द्योतयितुं
तस्मिन्वेदिहविर्धानयोः संपत्तिमाह अथ यज्जघनेनेति शकटस्याधः पतनं वारयितुं
ईषाग्नी निंभनार्थमिथीकस्तंभी ईषाद्वयं यत्र संसृज्यते ततः प्रसङ्गः तयोरीषयोर्मध्य
देशः प्रउगं तच्च पश्चाद्विस्तृतं पुरस्ताद्ध्रसीयः वेदिरपि तथाविधा त्रिंशत्पदानि पश्चात्ती
रश्ची भवति चतुर्विंशतिः पुरस्तात्तिरश्चीति श्रुतेः अनस्तत्सारूप्यात्प्रउगस्य वेदित्वप
देशः नीड एवेति धान्यनिधानाय परिश्रितप्रदेशो नीडः हविर्धानमपि परिश्रितं परि

अपणसाम्यान्नीडस्य हविर्द्धानत्वं ओपोद्घातिकं समंत्रमभिमर्शनं विधत्ते सधुरमिति
अस्याभिमर्शनस्य प्रयोजनमाह अग्निर्वा इति युगस्य धुरि भवो ग्निर्धुर्यः भवेच्छंदसी
तियत् हविर्ग्रहणाय शाकटस्य परिश्रितप्रदेशं पश्चाद्भागं यास्यन् तं धुर्यं पौरस्त्यम
ग्निमतिक्रमिष्यन् भवति॥ तदतिक्रमे च सक्रुध्येत् तस्य प्रसादनायैतद्धूरसीति मंत्रो
च्चारणं तस्मा एवाग्नये निह्नुते अपनयति अतिक्रमजनितं स्वापराधं प्रशमय्य प्र
सादयति ह्नुङ् अपनयने इति धातुः श्लाघह्नुङ्स्थाशपामिति तच्छब्दात्त्वन्तु थर्वः पश्वा
स्माकं हिंसिता॥ योप्यस्माभिर्हिंस्यः॥ तद्द्विविधं शत्रुमेव धूर्व हिंस्याः योस्मान्निति हि
मंत्रार्थः॥ तथा सत्यसेवं प्रार्थितो ग्निरतिक्रमं तमप्यध्वर्युं न बाधत इत्यर्थः॥ तन्मंत्रोच्चा
रणेन शत्रुहिंसनं महर्षिव्यवहारेण संवादयति॥ तद्धेति॥ तत्राभिमर्शन एतद्दा
रुणिराह स्म एतच्छब्दपरामृष्टं दर्शयति अर्द्धमासशा इति मासस्यार्द्धमर्द्धमासः अ
र्द्धं नपुंसकमित्येकदेशिसमासः अर्द्धमासे अर्द्धमासे पौर्णमासे दर्शे च संख्यैकवचनाच्च
वीप्सायामिति शस्प्रत्ययः॥ एतद्ध स्मेत्यृषिवाक्याभिप्रायकथनं एतदिति धूरसी
त्यभिमर्शनमित्यर्थः अथ समंत्रकमीषाभिमर्शनं विधत्ते अथ जघनेनेति कस्त्वमी
व्याख्याता मो शाकट त्वं देवानां संबंधी भवसि ततः शुद्धमं· व्रीहिभिः पूर्णतमं· प्रिय
तमं· हविषो वाहकतमं· देवानामाह्वातृतमं चासि· किंच· व्रीहिभारापादितवक्रतर

15

रहितं· हविषोधारकमसि अतो दृढं भव· भग्नं माह्वारिति देवानामसीत्यादिपदानामर्थः
अत एवेति यद्यप्ययं मंत्र ईषाग्नाभिमर्शने जप्यः तथाप्यवयविस्तुत्यावयवोपि स्तुतो
भवतीत्यभिप्रेत्यैतन्मंत्रवाक्यं वोढृत्वमत्वादिगुणकथनेनान एवोपस्तौति अभिप्रत्
येषा परित्यागेन तदवयविशकटं स्तुतवतोभिप्रायमाह उपस्तुतादित्यादिना ध्यानंत्व
सं· देवानां तस्मिञ्जननेपर्वाशमित्यर्थः ध्रौत्वश्चाविति भौवादिको धातुः अह्वलामाशा
स्त इति यज्ञपतिर्मा का धक्षत् कुटिलगतिर्मा भवत्विति मंत्रवाक्ये प्रतिपादनात् करणनि
षेध एवाह्वलाशब्दार्थः यद्वा ह्वल ह्मल स्वलेरत्यर्थः शकटस्यारोहणं विधत्ते अथाक्रमन
इति हे शकट त्वां विष्णुरेवाक्रमतां नाहमिति मंत्रार्थः विष्णोरेवाक्रमणं किमिति प्रा
र्थ्यत इति चेत्तत्राह यज्ञो वा इत्यादि विष्णोर्यज्ञस्य च व्यापनसामान्यात्तादात्म्यव्यपदेशः
एषां देवानामधेये यं वैष्णवी विक्रांतिः इमामिति पूर्वत्रान्वयः का पुनरियमिति तां दर्शय
ति इदमेवेत्यादिना त्रैविक्रमसमये इदमेव परिदृश्यमानं पृथिव्याख्यं स्थानं प्रथमेन
पादनिधानेनाक्रममाणः पस्पारपलयामास स्पृ प्रीतिपलनयोरिति धातुः निगदसि
द्धमन्यत् पुरोडाशीयानां व्रीहीणां समंत्रकमवेक्षणं विधत्ते अथ प्रेक्षत इति प्राणो वा इ
ति वायुः प्राणो भूत्वा नासिके प्राविशदिति श्रुतेः प्राणवातयोरैकत्वं न तथा सति ब्रह्म
णा मंत्रेणैव प्राणाय त्वा यवानाय एन दुरुगायं उरुभवनकीर्तनं कुरुत इत्यर्थः यद्यन्नेति १५

अत्रपुरोडाशीयेषुव्रीहिषुयदिदंकिंचित्तृणादिकमापन्नंक्षिप्तंभवेत् तदपहतमितिमंत्रेण
निरस्येत्यर्थः यदितुतत्रतृणादिकंनभवेत् तदापुरोडाशीयंव्रीहिसमूहमेवानेनमंत्रेणाभि
मृशेदित्यर्थः वैहविर्ग्रहणायस्पर्शनंसमंत्रकंविधत्ते अथाभिपद्यतइति अभिपद्यते आ
लभते स्पृशति हविर्ग्रहीतुंबध्नंतुपंचांगुलयइतिमंत्रार्थः मंत्रगतपंचशब्दार्थमाह पंच
वाइतिपांक्तोवाइति पंचपदापंक्तिः यत्तोपिधानाकरंभादिपंचहविष्कइतिपंचसंख्या
योगसमान्यात्पांक्तः तथाचतैत्तिरीयकं धानाःकरंभः परिवापः पुरोडाशः पयस्यातेन
पंक्तिराप्यतेनयज्ञस्यपांक्तत्वमिति तथासतिएतद्देतेनपंचशब्दोपेतमंत्रोच्चारणेनात्रास्मि
न्नाकर्षेपांक्तंयज्ञमेवधारयतीत्यर्थः अथसमंत्रकंहविर्ग्रहणंविधत्ते अथगृह्णातीति
अनुष्ठेयहविर्ग्रहणानुगुण्यंमंत्रस्यदर्शयति सवितावाइत्यादिना देवानांमध्येसविताख
लुप्रसवितास्वस्वव्यापारेषुसर्वस्यलोकस्यप्रेरयितास्तुवतिप्रेरयतीतिसवितेतितन्नाम
व्युत्पत्तेः अश्विनावध्वर्यूइतिपुराखलुदेवकर्तृकेयज्ञेअश्विनावध्वर्यूअभूतांअतस्त
योरेवबाहुभ्यांहविर्गृह्णामीत्यस्यार्थस्यप्रतिपादकोमंत्रभागोयुक्तइत्यर्थः पूषाभागदुघ
इति भागंदोग्धीतिभागदुघोभागप्रदइत्यर्थः दुहःकप्घश्चेतिकब्घत्वे ।। नादन्तःपूषा
पाणितलाभ्यांसर्वस्यजनस्यादानंभोज्यमन्नमुपनिधानात् उपनिधातुमुपस्थापयितुंशी
लवान् ताछीलिकस्तृन् नलोकाव्ययेतिकर्मणिषष्ठ्याःप्रतिषेधः तथाचपूषदेवतायाहस्ता

भ्यांहविर्ग्रहणंयुक्तरेतमितिभावः इतोप्यश्विनोर्बाहुभ्यामित्यादिकंयुक्तमित्याह सत्यंदे
वाइति देवाइतियत्नतत्त्वंभमरणत्वेनविनाशाभावात् मनुष्यास्तुतद्वैपरीत्यादनृत
रूपाः तस्मादश्विनोर्बाहुभ्यामित्यादिमंत्रभागोच्चारणात् देवतारूपेणसत्येनैवतद्धवि
र्ग्रहणंकृतंभवतीत्यर्थः अग्नयेजुष्टमितिदेवतादेशनस्यावश्यकर्तव्यतांप्रतिपादयति
सर्वाहवाइत्यादिना स्वस्वनामसंभावनयोपस्थितानांमध्येकस्याश्विदग्न्यादिदेवतायाः
आदेशनेसतिसहवर्त्तमानाभ्यस्ताभ्यः षष्ठ्यर्थेचतुर्थी तासांदेवतानामसमदमकलहं
सपरस्परमविरोधंकरोति प्रकांतरेणापिदेवतादेशनस्यकर्तव्यतांप्रतिपादयतियावती
भ्यइतियत्परिमाणविशिष्टाभ्यइत्यर्थः ऋणमुहैवेति स्वस्वनामोद्देशेनगृहीतंहविःऋ
णमेवताःसर्वादेवतामन्यंते कुतइदमवगतमितिचेत्॥उच्यते यत्कामायास्यफलस्येच्छ
याहविर्गृह्णातितंकामंकाम्यमानंफलविशेषमस्मैयजमानाययस्मात्समर्द्धयेयुः तेनका
रणेनहविषऋणरूपत्वमवगतमित्यर्थः यत्काम्येतियच्छब्दादिच्छाकाम्यच्चेतिकाम्यच् तदंता
दकारप्रत्ययेतृतीयालुक् तस्माद्धविषिदेवतानामृणत्वाभिमानात्फलप्रदानेनतत्प्रत्यर्पणा
र्थंतत्तद्देवतानामवश्यमादेष्टव्यमित्यर्थः अग्नीषोमीयादिहविरंतरेप्युक्तमितिदिशति एव
मेवेति एवमेवआग्नेयवद्देवयथाक्रमंअग्नीषोमीयादीनिहवींषिगृह्णीयादित्यर्थः अत
एवमंत्रकांडेआग्नेयहविर्ग्रहणानंतरंअग्नीषोमाभ्यांजुष्टंगृह्णामीतिग्रहणमंत्रशेषआम्नातः

कात्यायनोप्यसूत्रयत् एवमग्नीषोमीयंप्यादेवतमन्यदिति निरूप्तशेषस्यसमंत्रकमभिम
र्शनंविधत्ते अथेति नघतएवेति तत्तत्रशाकटेयतएवयस्मादेवस्थानाद्गृह्णातितदेतस्था
नमेवानेनमंत्रेणपुनराप्याययतिवर्धयति भूतायभूतयेसम्बध्यर्थंत्वामभिमृशामिअरा
तयेअदानायासमृद्धयेनाभिमृशामीत्यस्यार्थस्यमंत्रेणप्रतिपादनात् सूत्रितंहिभूतायत्वेति
शेषाभिमर्शनमिति अथसमंत्रकंप्रागवेक्षणंविधत्ते अथप्राङिति परिवृतमिवेत्यादि
परिवेष्टितमेवखल्वनोभवति धान्यनिधानार्थंतन्मध्येवस्थितस्याध्वर्योश्चक्षुःपाप्मगृ
हीतमिवकाचकामलादिदोषदूषितमिवद्रष्टुंनसमर्थंभवति तत्रसहकारिणआलोकस्या
भावात् कथंतस्यदर्शनोपायइतितदुच्यतेअवेक्षणमंत्रगतस्वरितिशब्देनस्वर्गवाचिना
तत्साधनभूतोयज्ञोभिधीयते अहरादीनिचतेनलक्षणयाप्रतिपाद्यंते अतएवस्वर
शब्दस्यसूर्यनामकत्वमुक्तंयास्केन स्वरादित्योभवतिसुअरणःसुईरणइति तत्तथासति
एतन्मंत्रकरणकेनप्रेक्षणेनस्वरशब्दप्रतिपादितंयज्ञादिचतुष्टयमर्थजातंप्राच्यांदिशि
प्रथमतउपलभ्यमानमतोस्मात्शाकटस्थानादभिविपश्यत्सवलोकयति अथसमंत्रकं
शाकटादवरोहणंविधत्ते अथावरोहतीति तेहेतइत्यादिअस्ययजमानस्ययएषोध्वर्यु
र्यज्ञेनचरति हविर्ग्रहणादिकमनुतिष्ठति तंप्रयंतंशाकटस्थानात्प्रगच्छंतमनुसरंत
यजमानस्यतेगृहाः इतोस्माद्भूलोकात्प्रच्योतोरीश्वराःप्रच्युतिंप्राप्तुंसमर्थाः तथात
स्ययजमानस्यकुलंविक्षोभ्योः विक्षोभयितुंसमर्थाः ईश्वरेतोसन्कसुनाविनिच्यवते:

क्षुभेः। तो सुन्प्रत्ययः अनेन मंत्रेणावरोहन्नध्वर्युस्तानेव यजमानस्य गृहान्स्वां पृथिवीं दृढी
करोति दृंह दृंहिर्वृद्धाविति धातुः एवं सत्सूक्तदोषनिरूढत्तिमाह तथेति निरूढेन हविषा
सहाग्निसमीपगमनं विधत्ते अथ प्रैतीति उर्विति मंत्रस्य प्रागाम्नातं ब्राह्मणमंत्रादिरि
16 ति सोऽसाविति अंतरिक्षं वा अनुरक्षश्चरतीत्यादिको यो वाक्यशेषः सोऽसावेवात्राम्नातस्या
पितस्य मंत्रस्य बंधुरनुकूलः अतोऽत्राप्यनुसृत्य योजनीय इत्यर्थः आहृतस्य हविषः सादनं वि
धत्ते स यस्येत्यादिना गार्हपत्ये आहवनीये वा यस्मिन्नग्नौ श्रवणं तस्य पश्चात्सात्रासादनं नि
रूढस्य हविषः सादनं च कर्तव्यमित्यर्थः सादनमंत्रगतस्य नाभिशब्दस्याभिप्रेतमर्थमाह म
ध्यं वा इति मनुष्यादिशरीरेषु नाभेर्मध्यदेशवर्तित्वात् पृथिव्या नाभिरिति मध्यमेवो
च्यते तच्च मध्यं अभयं भयरहितं प्रांतदेशे हि चोरव्याघ्रादिभयं अतः पृथिव्याः संबंधि
निराक्षसादिभयरहिते स्थाने त्वां सादयामीति मंत्रभागस्यार्थः अदित्या उपस्थ इति मंत्र
स्य द्वितीयभागं व्याचष्टे उपस्थ इवेति यद्वस्तु सुगुप्तं सुष्टु रक्षितं यथा भवति तथा गोपायं
ति रक्षंति एनन्तु उपस्थ इव उत्संग इव उदरमध्य इव अभार्षुर्भृतवंत इति खलु वदंति लौकिकाः
अतश्च यस्मिन्स्थाने सादितं हविः सुगुप्तं भवति तत्स्थानमुपस्थशब्देन मंत्रगतेन विवक्षितं
अभार्षुरिति भृञ् भरण इत्यस्मात् लुङि सिचि वृद्धिः गोपायंतीति गुपू धूप विच्छीत्याय प्रत्ययः
अंतिमं भागं व्याचष्टे अग्ने हव्यमिति इयं वा अदितिरिति श्रुतेः अदितिर्हि पृथिवी तस्याश्चाधि
पतिरग्निः स चात्र गार्हपत्यरूप आहवनीयरूपो वा तस्मै चाग्नये तेनाधिष्ठितायै पृथिव्यै च रक्ष १६

पार्थमेतद्ध्विः अनेन मंत्रभागेन दत्तं भवतीत्यर्थः ॥ इति सायणाचार्यविरचिते माधवी
ये वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्मणे प्रथमकांडे प्रथमेऽध्याये द्वितीयं ब्राह्मणं ॥ प
वित्रकरणमंत्रगतस्य वैष्णव्याविति पदस्य तात्पर्यमाह यज्ञो वा इति वेवेष्टि व्याप्नोतीति व्यु
त्पत्त्या यज्ञ एव विष्णुः तथा च मंत्रगतस्य वैष्णव्याविति शब्दस्य हे दर्भनाड्यौ युवां यज्ञसंबं
धिन्यावेव भवत इत्ययमर्थः प्रतिपादितो भवति संख्यांतरं वारयितुं पवित्रयोर्द्वित्वं विधत्ते
ते वा इति तदेतदुपपादयति अयं वा इति यः पवमानो वायुरयमेव पवित्रं पवमानसाधनं शुद्धि
हेतुः पुत्रः संज्ञायामिति करणे इत्रप्रत्ययः पंथानश्च विशुध्यंति सोमसूर्यांशुमारुतैरित्यादि
स्मृतेर्वायोः शुद्धिहेतुत्वं एक इव वेति स च बाह्ये वर्त्तमानो वायुः एकरूप एव यातीति स एव पु
शरीरानुप्रविष्टः सन् वृत्तिभेदेन प्राङ् प्रत्यङ् चरति इडापिंगलादिनाडीद्वारा बहिर्निर्ग
च्छन् प्राणः प्राङित्युच्यते तयैव द्वारा पुनरंतः प्रविशन् प्रत्यङिति तावेतौ वृत्तिभेदौ प्राणो
दानावित्युच्येते तत्र प्राङ् संचरन् प्राणः उत् ऊर्ध्वदेशाद् आनितीति अंतः प्रवेशानुगुणं चेष्ट
त इति उदानः तस्य च शब्देन प्रत्यङ्मुखोऽपानो विवक्षितः न तूत्क्रांतिहेतुरुदानवृत्तिरिति
तस्याऊर्ध्वमुखत्वेन प्रत्यक्त्वानुपपत्तेः अत एव तैत्तिरीयके समानप्रकरणे पवित्रयोः
प्राणापानरूपत्वमाम्नायते प्राणापानौ पवित्रे यजमान एव प्राणापानौ दधातीति ए
वं द्विधा भिन्नस्यैतस्यैव वाय्वाख्यस्य पवित्रस्य मात्रां परिमाणमनुसृत्य सवित्रयोर्द्वि
त्वं त्रित्वपक्षमप्युपन्यस्यति अथो इति पक्षांतरद्योतको थो शब्दः तत्रोपपत्तिर्व्यानो ही
ति मुख्यपवित्रस्य वायोः प्राणोदानवत् व्यानाख्यो वृत्तिभेदस्तृतीयो हि यस्माद्विद्यते

तस्मात्सवित्रत्रित्वमित्युक्तमित्यर्थः द्वित्वपक्षमेवनिगमयति द्वेत्वेवेति अथयःप्रा
णापानयोःसंधिःसव्यानइतिश्रुतेः व्यानस्यसंधिरूपतयातदुभयातिरिक्तत्वाद्वित्व
पक्षएवश्रेयानित्यर्थः कात्यायनस्तुपक्षद्वयमपिसूत्रयामास कुशौसमावप्रच्छिन्ना
ग्रावनंतर्गर्भौकुशौच्छिनत्तिपवित्रेस्थइतित्रीन्वेति अथोत्सवनंविधत्ते ताभ्यामितिप्रो
क्षण्याभिरिति प्रोक्षण्यआपः करणेल्युट् ताभिःप्रोक्षतीत्युत्सवनस्यप्रयोजनकथनंन
तुप्रोक्षणविधिः यस्मादुत्सूताभिरद्भिःप्रोक्षणंकर्तव्यंतस्मात्पवित्राभ्यांतासामुत्सवनं
कार्यमित्यर्थः तदेतदुत्सवनंस्तोतुमनुवदति तद्यदितिउत्सवननिवर्त्यामशुद्धिंदर्श
यितुमितिहासमुदाहरंति वृत्रोहेति वृत्रासुरःप्रायइतिआपस्सर्वशायनंकृतवान् गौ
डेनलिट्योरनेकाचइतियण् द्यावापृथिव्याविति द्यौश्चपृथिवीचद्यावापृथिव्योर्अं
तरांतरेणेतिद्वितीया द्यावापृथिव्योर्मध्यइत्यर्थः वरणाद्वृत्रइतिनामनिर्वक्तिस्य
दितिसहनइत्यादि पूतिर्दुर्गंधः सर्वतएवापोभिलक्ष्यप्रसृतोभूत् अतएवखल्वय
मपिसमुद्रःसर्वतःसर्वमापस्सवर्त्तते तस्माद्दुर्गंधात्प्रसृताद्वृत्रादिमाआपोबीभत्संत
क्रिरेजुगुप्संतेस्म मान्बधदान्शान्भ्यइतिबधेर्वैरूप्येसन्प्रत्ययः बीभत्समानास्ता
आपःतत्संस्पर्शंपरिहर्तुंउपर्युपरिवर्तमानाअतिपुप्लुविरे जलाशयमतिक्रम्यतीर
देशंप्राप्ताआसन् प्लुङ् गताविति धातुः प्लुताश्चताआपोदर्भात्मनापरिणताःअय

मर्थस्तैत्तिरीयके विस्पष्टमाम्नातः इंद्रो वृत्रमहंस्तोपो भ्यम्रियत तासां यन्मध्ये ध्यं यज्ञि
यं सदेवमासीत्तदपोदक्रामत्ते दर्भा अभवन्निति अनापूयिता इति आसमंतात्पूयं दौर्गंध्यं
प्राप्ता आपूयिताः न आपूयिताः अनापूयिताः पूयी विशरणे दुर्गंधे च अस्मात्कर्त्तरि निष्ठा
यां छांदस इट् यद्वा आसमंतात्पूयमासां संजातमित्यापूयिताः न दस्य संजातमिति तारका
दित्वादितच् इतरास्विति निर्दर्भासनापरिणतजलव्यतिरिक्तासु अमेध्यत्वापादकं किंचित्सं
स्पृष्टमिव भवति तत्र हेतुर्यदेना इति एवमनापूयिताच्छिकारदर्भमयाभ्यां पवित्राभ्यामा
साममपामुत्पवनं कुर्वन्पूयसंसर्गकृतं तदमेध्यत्वमपहंति तेन तथाविधाभ्यां विधास्यमा
नं प्रोक्षणं च मेध्याभिर्मेधार्हाभिः शुद्धाभिरेवाद्भिः कृतं भविष्यतीत्यर्थः तस्मादित्य
सवननिगमनं विहितमुत्पवनमनूद्य मंत्रं विधत्ते स इति सविता वा इत्यादि पूर्ववत्
अच्छिद्रेणेत्यस्यार्थमाह यो वा इति योयं वायुः पवते एव खल्वविच्छेदेन सर्वत्र वर्त्तमानत्वात्
छिद्ररहितं पवमानसाधनं एते वा इति एते सूर्यस्य रश्मय उत्पुष्टं पवितारः शोधकाः
अतस्तैः करणभूतैरुत्पवनं युक्तमित्यर्थः उत्पवनानंतरं कर्त्तव्यं विधत्ते ता इति ताः प्रोक्ष
णीरपः अग्निहोत्रहवण्या पात्रेण सार्द्धं सव्ये पाणौ धारयन् देवीराप इति मंत्रेण दक्षिण
हस्तेनोदिंगयति ऊर्द्ध्वं सेचनेन चालयति इगि रिगि लिगि गिगत्यर्थाः इति धातुः मंत्रता
त्पर्यमाह उपस्तौतीति एतत् एतेन देवीराप इति मंत्रपठनेन एना अपः प्रशंसत्येव तेन
न च प्रशंसनेन महयति पूजयत्येव कस्तस्यासां स्तावकस्तथाविधो मंत्र इति तं दर्शयति

देवीरिति स्तुतिरूपतामुपपादयति देव्य इत्यादिना अपां देवतारूपत्वेन देवीत्वं प्रसि
द्धमिति हि शब्दार्थः तायदित्यादि अग्रेपुरतो वर्तमानं समुद्रं गच्छंती सम्येगुवः अग्रे
गूशब्दस्य समुद्रगामित्वं विवक्षितमिति भावः ऊर्गमादीनामिति निगमे ऊकारः ताय
स्प्रथमा इति आपः खल्वभिषवार्थमासिच्यमाना यष्टव्यदेवताभ्यः पूर्वं सोमरसमास्वा
दयंति तेन सोमपानेन अग्रे प्रथमं स्वात्मानं पुनंती सम्येपुवः उभयत्र तत्पुरुषे रूनिव
ङुमित्यग्रशब्दात्सप्तम्याः अलुक् साधुयज्ञमित्यादि अग्न इममित्यग्नशब्दः प्राशस्त्यवा
ची अग्ने प्रशस्ते अद्यास्मिन्काले इमं यज्ञं प्रापयतेति प्रतिपादयता मंत्रेण साधुयज्ञं न
नयस्येते वोक्तं भवति प्रागप्रस्त्वं प्राप्तस्य साधुत्वनियमात् यज्ञस्यैपतिरितिशब्देन यजमा
नो विवक्षित इति व्याचष्टे साधुयजमान इति अत्रापि पूर्ववत् अग्नेशब्दस्य व्याख्यानं सा
ध्विति विशेषणं युष्माँ इंद्र इति हे आपो युष्मान् वृत्रं हंतुकाम इंद्रः स्वाहाय्यकरणार्थं प्रा
र्थयामास ताश्च यूयं वृत्रशरीरनिरुद्धाः विस्रंभगमनार्थं वृत्रं हंतुं इंद्रं प्रार्थितवत्यः अत
इदं ग्विधं परस्परप्रार्थनं युष्माँ इंद्र इत्यादिना मंत्रभागेन प्रतिपाद्यत इत्यर्थः तदेताभ्य
इति यद्यपि प्रोक्षणीनामपां स्वातिरिक्तजलेन शुध्यर्थं प्रोक्षणं नास्ति तथापि प्रोक्षिताः
स्थ स्तास नैव प्रोक्षिता भवतेति मंत्रेण प्रतिपादनात् प्रोक्षणवत्त्वसिद्धेः तत्तेन मंत्रपाठेना
प्रोक्षणजनितमपराधं एताभ्यः प्रोक्षणीभ्यो निकृंतते अपनयति प्रोक्षणपात्रगतेनैवो
दकेन तत्पात्रगतमुदकमनेन मंत्रेण प्रोक्षितमस्मि इति तात्पर्यार्थः अत एवोक्तं सूत्रकृता कास्या १८

यनेन प्रोक्षिताः स्थेति तासां प्रोक्षणमिति॥ तैत्तिरीयकश्रुतिस्तु एतन्मंत्रपठनमेवासां प्रोक्षणं मेने
यदाह प्रोक्षिताः स्थेत्याह तेनापः प्रोक्षिता इति एवं संस्कृताभिरद्भिर्हविषः प्रोक्षणं विधत्ते अ
थह विरिति वक्ष्यमाणस्य हविःप्रोक्षणविधिशेषार्थवादस्य सर्वप्रोक्षणविधिसाधारण्यमा
ह एको वा इति बंधुः अनुकूलं स्तावकमर्थवादवाक्यं सर्वस्यापि प्रोक्षणस्य एको वै एक विधमे
व अतस्तत्सर्वत्र योजनीयमिति भावः किं पुनस्तदित्याह मेध्यमिति विहितं प्रोक्षणमनूद्य मं
त्रं विधत्ते अग्नय इति मंत्रदेवतादेशनस्य प्रयोजनमाह तद्यस्या इति उक्तमन्यत्राप्यतिदिश
ति एवमिति एवमनेनैव प्रकारेण यस्यै यस्यै देवतायै हविर्गृहीतं भवति तत्तन्नाम चतुर्थ्यंते
नादिशेदित्यर्थः हविःप्रोक्षणानंतरं यज्ञपात्राणां समंत्रकं प्रोक्षणं विधत्ते अथेति दैव्यायेह
ति देवानामिदं दैव्यं देवास्त्वयजा विति प्राग्दीव्यतीयो यञ् शुंधतिः शोधयति शुंध शुद्धावि
ति धातुः देवयज्यायाइति देवयजनरूपाय कर्मण इत्यर्थः मंत्रस्यापरभागमनूद्य व्याच
ष्टे यद्व इति तक्षा वर्द्धकिः अन्यस्तु व्यतिरिक्तो वृषलादिः स सर्वोप्यशुद्धत्वादमेध्यः त
त्संस्पर्शकृतं यत्तदेषां पात्राणां दोषजातं एतदनेन प्रोक्षणेनैषां निवर्तयन्नत्सर्वं पात्रं यज्ञा
र्हं करोति अतएवैतद्विधस्यार्थस्य प्रख्यापनाय यद्व इति मंत्रभागः पठितव्यः इत्युपसंहरति
तस्मादिति पराजघ्नुरिति पराहतः दूषितं चक्रुरित्यर्थः इति सायणाचार्यविरचिते माध
वीये वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्मणे प्रथमकांडे प्रथमाध्याये तृतीयं ब्राह्मणं ३
अथ निरुप्तव्रीह्यवहननाय कृष्णाजिनादानं विधत्ते अथेति सर्वत्वायेति अवयवकार्त्स्न्या
येत्यर्थः कथं कृष्णाजिनादानेन यज्ञस्य कार्त्स्न्यमित्येतदुपपादयितुं पुरावृत्तमुदाहरति यज्ञो

इत्यादिना कृष्णोभूत्वेति कृष्णमृगस्यरूपमास्थाय अवतस्थायेति अवतिष्ठदित्यर्थः छोभ्यश्छाद
नइ॰ सस्मात्क्रोल्पप् तस्यकृष्णाजिनस्ययज्ञरूपतांवक्तुंत्रयीमयत्वंप्रतिपादयति तस्य
यानीत्यादिना शुक्लकृष्णलोम्नांसंग्रहादृक्सामात्मकतामुक्त्वाविभज्यापिदर्शयति यानि
शुक्लानीति येदिवेति पक्षांतरकथनं इतरथाउक्तवैपरीत्येनेत्यर्थः तदेवदर्शयति
न्यायेवेति एवंकृष्णाजिनस्यऋक्सामरूपतामुक्त्वायजूरूपत्वमाह योन्येवबभ्रूणीवेति
पिंगलवर्णानीवयानिरोमाणिहरीणिहरितवर्णानितानियजुषांरूपं अस्त्वेवमृक्सामय
जुरात्मकत्वंकृष्णाजिनस्यतदाने दोन कथंयज्ञस्यकार्त्स्न्यमित्यतआह सेषेति येषाऋग्य
जुःसामात्मिकात्रयीविद्यासेवयज्ञः तत्साध्यत्वात् यएषशुक्लकृष्णादिलक्षणोवर्णःए
तत्तस्यास्त्रय्याउक्तरीत्याशिल्पंचित्ररूपं अतएवोपरिष्टात्सोमप्रकरणेमंत्रआम्नायते
ऋक्सामयोःशिल्पेस्थ इति एवमपक्रांतयज्ञरूपस्यकृष्णाजिनस्यादानंयज्ञस्यकार्त्स्न्याय
भवतीत्यर्थः कृष्णाजिनमधिदीक्षंतइति यस्मादेवंकृष्णाजिनंत्रयीरूपत्वेनयज्ञरूपंतस्मा
त्सोमांगभूतादीक्षापिकृष्णाजिनस्योपरिक्रियते कृष्णाजिनाआदानस्यप्रयोजनांतरमाह
तस्मादधीति अधिरुपर्यर्थः कृष्णाजिनस्योपरि यदवहननंपेषणंचकर्तव्यं तथासतित
द्धविरस्कन्नंस्कन्नरहितमसद्भवेत् इतिबुध्या यदिहिभूम्यामेवावहननादिकंकुर्यात्तदा
तस्यहविषोवश्यंस्कन्नदोषः इत्यभिप्रायः एतदेवविवृणोति तद्यदेवेति अवहननस
मयेतंदुलोवापेषणसमयेपिष्टंवाअत्रकृष्णाजिनेयदिनामस्कंदात् स्कंदेत् लेप्याश

गमः तत्तदायत्तएव यज्ञः प्रतितिष्ठेत् न तु नस्यस्कन्नदोष इत्यर्थः उक्तमादानमन्त्रं विधत्ते
अथेति मंत्रगतशर्मन्शब्दस्यतात्पर्यमाह चर्मवा इति यदेतत् कृष्णस्य चर्माजिनं अस्य यज्ञस्यै
व तदजिनं तल्लोकप्रसिद्धचर्मशब्दाभिधेयं सन्मानुषं मनुष्यसंबंधिरूपं भवति एतदेव दे
वत्रा देवेषु सुखकरत्वात् शर्मेत्युच्यते अतो दैविके कर्मणि शर्मासीति तत्स्तुतिरुपपन्ना
देवत्रेति देवमनुष्येत्यादिना सप्तम्यर्थे त्राप्रत्ययः उपात्तस्य कृष्णाजिनस्यावधूननं विधत्ते
तदवधूनोतीति तन्नाष्ट्रा इति तत्तन्न समंत्रकावधूननेन गतमन्यत् कृष्णाजिनवस्त्रसक्त
मवधूननं पात्राणां निषेधति अतिनसेवेति नकेवलमवधूननस्य रक्षोपहननमेव प्रयोज
नं किंतु अयज्ञियत्वविश्लेषोपीत्याह यद्वीति रक्षः प्रत्यतिसंपर्कात् यत् खल्वस्य कृष्णाजि
नस्यामेध्यं मेध्यानर्हं अयज्ञियं रूपमभूत् तदेवास्यैतेन मंत्रेणावधूनोति निरस्यति तिनस्यस
मंत्रकं प्रकारविशिष्टं स्तरणं विधत्ते तदिति प्रतीचीनाग्रस ग्दिशिस्थिताग्रीवा यथा भव
ति तथा इयं वा इत्यादि दितिः खंडनं न विद्यते स्या इति व्युत्पत्त्या मंत्रगतादितिशब्देन इयमे
व पृथिवी विवक्षिता कथमन्यदीयात्वगन्यस्य त्वग्भवतीत्याशंक्याह तस्या इति अस्यां भूम्या
मधि उपरिभागे यदिदं किमपि वस्तु वस्थितं तत्तस्या अस्यै पृथिव्यै सा त्वक् कृष्णाजिनमप्युप
र्यवस्थानात्तस्या एव त्वगिति स्तुतिः मंत्रस्य द्वितीयभागमनूद्य व्याचष्टे प्रतीति स्वः स्वकीयो
पि जनः आत्मीयं जनं प्रति संजानीते परस्परात्त्रकूल्यं प्रकटयितुं संज्ञां करोति तत्तथा कृष्णा
जिनभूम्योः समानत्वात् तामेवायं मंत्रभागो वदति संज्ञानस्य प्रयोजनमाह नेदिति परस्प

रानुकूल्यज्ञानाभावे हन्यमन्योहिंस्यात् नैव तादृशी अन्योहिंसाभवतीति सनेनाभिप्रायेणेत्यर्थः
उलूखलनिधानपर्यंतं कृष्णाजिनस्यानुत्सर्जनं विधत्ते अभिनिहितमिति सव्येनस्पृशतो।
भिप्रायमाह नेदिति यदि त्युलूखलनिधानात्प्रागेव कृष्णाजिनस्पर्शमुत्सृजेत् तदेहास्मिन्कृ
ष्णाजिने राक्षसादिकं प्रविशेन्न तन्नैवं भवत्विति विशन्निति विशतेर्लेटि बहुवचने आडाग
20 मः श्रेरन् तादेशोइतश्च लोप इतीकारलोपः ननु स्पर्शेपि उलूखलनिधानात्पुराकुतो रक्षां
सि न प्रविशंतीति तत्राह ब्राह्मइति हियस्माद्ब्राह्मणो रक्षसामपहंता मंत्रप्रभावेन तस्मा
त्तेन स्पृश्यमानं कृष्णाजिनं राक्षसादिर्न प्रवेष्टुं शक्नोतीति भावः अथ समंत्रकमुलू
खलस्य निधानं विधत्ते अथेति ग्रावासीति वैकल्पिको मंत्रः अत एव सूत्रकृतोक्तं
निदधात्युलूखलमद्रिरसि ग्रावासीति वेति तत्राद्यमंत्रस्याभिप्रायमाह नद्यथेति
अदः शब्दो लुप्तविभक्तिकः अमुत्र सोमयागे यथा यागसाधनस्य सोमस्य ग्रावभिरभि
षवः एवमेवोलूखलादिभिः साध्यमवहननादिकं हविर्यज्ञसाधनं व्रीह्यादिकमभिषुणो
ति वितुषीकरणादिभिः संस्करोति कुत एतदित्यत आह अद्रयइति एतेषां सोमाभिष
वहेतूनां ग्राव्णां पुरोडाशनिष्पत्तिहेतूनामुलूखलादीनां च अद्रयइत्येतत्साधारणं ना
मअतो नामसाम्यात् उलूखलादिसाध्यमवहननादिकं ग्रावसाध्येन सोमाभिषवेण
तुल्यमित्यर्थः एवं च हे उलूखल त्वं अद्रिरसि सोमाभिषवहेतुग्रावासीति ग्रावत्वा २०

रोपणं मंत्रेण विवक्षितमिति व्याख्यातं भवति वनस्पतिविकारत्वं प्रसिद्धमिति वान
स्पत्यतामर्थमाह वानस्पत्योसीति वैकल्पिकं मंत्रमनूद्य व्याचष्टे ग्रावासीति पृथु
बुध्नोसीति उलूखलस्य विस्तीर्णमूलदेशवत्त्वं प्रसिद्धमित्यर्थः प्रति त्वेत्यादिकं मंत्र
द्वयशेषमनूद्य व्याचष्टे तदिति कृष्णाजिनोलूखलयोरन्योन्यहिंसा मा भूदिति पृथि
वीकृष्णाजिनयोरिवैकमत्यप्रार्थनं वदतीत्यर्थः उलूखले हविषः प्रक्षेपणं समन्त्र
कं विधत्ते अथेति यज्ञोसीति हि यस्माद्यज्ञो यज्ञसाधनं हविः अतोग्नेः शरीरमे
वेत्यर्थः यां वा इत्यादि हविर्ग्रहणार्थमथ वाचं यच्छतीति या वाक् प्राङ् नियमि
ता अत्रास्मिन्समये तामेवानेन मंत्रभागेन विसृजते अतो विसृजतेऽनेनेति विस
र्जनं हविरिति मंत्रपदस्यार्थः तदेतद्वाग्विसर्जनमुपपादयति तद्यदिति एतां वाच
मत्र विसृजत इति यत्तद्युक्तं हि यस्मादेष यज्ञो यज्ञसाधनं हविः उलूखले प्रत्यष्ठात्
प्रतिष्ठितमभूत् यस्माच्चात्रैष यज्ञः प्रसारि प्रसारितो विस्तारितोऽभूत् अतो हेतोर्वाग्यमन
स्य प्रयोजनं नास्तीति तद्विसर्जनमेव युक्तमित्यभिप्रायः हविरापवनात्पूर्वं लौकिकवाग्व्यव
हारे प्रायश्चित्तमाह स यदीति वैष्णवीमृचमिति इदं विष्णुर्विचक्रम इत्यादिकां यजुरपि वै
ष्णवमेव जप्यं देववीतय इति मंत्रशेषस्याभिप्रायमाह देवानिति यष्टव्यान्देवान् अवत्
अवतु तर्पयत्वित्यनेनैवाभिप्रायेण हि हविर्गृह्णाते अतो देववीतये देवानां तृप्तये इतिमं

त्रपदाभिप्रायः समंत्रकं मुसलादानं विधत्ते अथेति बृहद्ग्रावाहीति सोमसंस्कारक
ग्राववत् मुसलस्यापि हविःसंस्कारकत्वसाम्यात् ग्रावत्वं दीर्घत्वाच्च बृहत्त्वमिति बृ
हद्ग्रावन्शब्दाभिधेयता मुसलस्य प्रसिद्धेत्यर्थः तस्य मुसलस्योलूखले प्रक्षेपणं
समंत्रकं विधत्ते तदिति त्रामीष्वेति पदस्यार्थमाह हविःसंस्कुर्विति त्रामीष्व त्राम
यदोषश्रामनेन हविः संस्कुर्विसभिप्रायः सुशामित्रामीष्वेति मंत्रभागस्याभिप्रायमा
ह साधुसंस्कृतमिति अवहंतुं हविष्कृत आह्वानं विधत्ते अथेति उद्वादयति उच्चैराह्व
यतीत्यर्थः हविष्कृदेहीति तन्मंत्रः तस्य द्विःपाठो मंत्रकांडे द्विराम्नानात् हविष्कृच्छब्दा
र्थमावाग्वादिति निर्वापादौ मंत्ररूपाया वाचो हविष्करणसाधनत्वाद्वागेव हविष्कृत् अत
स्तामनेन मंत्रेणाह्वयन् हविर्ग्रहणकाले नियमितां वाचं विसृजेत् अतएव कात्यायने
अग्नेस्तनूरसीति मंत्रेण हविष्कृदेहीति मंत्रेण वा वाग्विसर्जनं कर्तव्यमिति विकल्पेन सू
त्रितं अग्नेस्तनूरिति वाचं विसृजते यजमानश्च हविष्कृतावेति वागुवाइति यावाक् ह
विष्कृत सैव खलु यज्ञः तस्य तन्निर्वर्त्यत्वात् तत्तथासति एतदेतेन वागात्मिकाया हविष्कृ
त आह्वानेन यज्ञमेव पुनराह्वयते ब्रह्मक्षत्रादिवर्णभेदोपजीवनेन हविष्कृदाह्वानमंत्रे
विशेषमाह तानि वा इत्यादिना वाचः संबंधीनि चत्वारि रूपाणि कानि पुनस्तानीत्याह एही

ध्यादि वैश्यस्य हविष्कृदागहीति मंत्रः॥ राजन्यबंधोः क्षत्रियजातेः हविष्कृदाद्रवेति॥ आपस्तंब
सु राजन्यवैश्ययोर्वैपरीत्येनासूत्रयत्॥ हविष्कृदेहीति ब्राह्मणस्य हविष्कृदागहीति राजन्यस्य ह
विष्कृदाद्रवेति वैश्यस्य हविष्कृदाधावेति शूद्रस्येति एवं पूर्वपक्षे तया ब्रह्मक्षत्रादिवर्णप्रयुक्तं
विशेषमुपन्यस्य स्वमतं निगमयति स यदेवेति॥ एतद्धीति॥ एहीत्येतत्खलु यज्ञियतमं अति
शायेन यज्ञार्हं॥ इड ह्यादित एहीत्याहेऽन्यत्रापि यज्ञे प्रयोगात्॥ शांततममिति आगह्याद्रवे
त्यादेः सकाशादेहीत्येतदेवातिशायेन शांतं प्रार्थनावाक्येष्वेहीत्येव सर्वत्र प्रयोगादागह्यादीनां च
निकृष्टप्रेषणरूपत्वाच्चेत्यर्थः॥ को सौ हविष्कृदिति तं दर्शयति॥ तदिति॥ पुरा खलु एतद्दा
क्षानानंतरं तैजायेव हविष्कृदुपोत्तिष्ठति अतस्तदानीं जायेव हविष्कृद्भूत्॥ तत्तस्मादिदानीम
प्येतद्दाक्षानानंतरं जायावायः कोप्यृत्विग्वाउपोत्तिष्ठति स एव हविष्कृदित्यर्थः॥ तदुप्युक्तं
सूत्रकृता॥ हविष्कृदेहीति त्रिराह्वयत्यतः पत्न्यवहंत्यन्योवेति॥ हविष्कृदाह्वानसमये दृषदु
पलयोः शम्यया समाहननं विधत्ते॥ स यत्रेत्यादिना॥ समाहननजनितां वाचं प्रशंसितुमनु
वदति॥ तद्यदिति॥ अथ यज्ञादुपधध्मैर्यज्ञविघातकासुरराक्षसादिनिवृत्तिहेतुतामुप
पादयितुमितिहासमुदाहरति मनोर्ह वा इति॥ पुरा खलु मनोः संबंधिन ऋषभस्य प्रश्वासाद्वा
च्च यज्ञविघातिनोऽसुरराक्षसादयः बाध्यमाना गताः ते च परस्परं संवादं कृतवंतः हेतिखेदे॥
अयमृषभो नोऽस्माकं पापं निकर्षं पराजयं सचते प्रापयति कथं खल्विमं हिंस्यामेति एवं संवाद

रूते किलातश्चाकुलिश्च ह्वावसुरपुरोहितौ बभूवतुः॥ तयोर्व्यापारमाह॥
तौ होचतुरित्यादिना श्रद्धादेवः श्रद्धैव देवो यस्य तथोक्तः श्रद्धालुरिति यावत्॥
आवं नु वेदावेति॥ आवामस्य मनोरभिप्रायं जानाव हा इत्यर्थः॥ अथ यास्य द्विवच
22 न इति भाषायामेवात्र विधानादाव मिति ह्रस्वोच्चारणं॥ विदज्ञान इत्यस्माल्लोट्यु
त्तमद्विवचने वेदावेति रूपं मनो याजयावेत्यादि॥ हे मनो त्वामनेन ऋषभेण याजयावे
ति श्रद्धालुं मनुं विप्रलभ्य लभ्य तमृषभमवधिष्वामिति तात्पर्यार्थः॥ मनावीमिति म
नोर्भार्या मनावी मनोरौ चेत्यौत्वं पुंयोगलक्षणो ङीप्॥ तस्येह स्मेति षष्ठ्यर्थे चतुर्थी॥
यत्र यस्मिन्देशे वदं सा स्तस्याः राक्षश्र्वण्वंति ततस्तस्मात् स्थानादसुरादयो बाधि
ताः पलायंत इत्यर्थः॥ पापीयः सचन इति॥ तिर्यग्जातेर्ऋषभस्य ध्वनेः श्रवणात्
प्रागस्माकं निकर्षमात्रं प्राप्तं॥ इदानीं तु मनुष्यशरीरान्निर्गतवाचः श्रवणादस्मा
कमतिशयं पापं पराजयः प्राप्नोति इममेवातिशयमुपपादयति भूयो हीति॥ तिर्य
ग्वाचः सकाशान्भूयो वकृतरं हि मानुषी वाग्वदति वर्णपदवाक्यात्मना कस्यचिदर्थ
स्य प्रतिपादकत्वादिति तदाकर्ण्य तावेव पुरोहितावस्यापि प्रतिक्रियां चक्रतुरित्याह किला
ताकुली इति॥ सा यत्त्रमेवेति॥ असुरघ्नी या वाक् क्रमेण मनोर्ऋषभे जायायां चासीत्॥
सा तयोर्हननान्निराश्रया सती यज्ञमेवाश्रयितुं यज्ञपात्राणि प्रविवेश॥ ततस्तेभ्यो २२

यज्ञपात्रेभ्यःसकाशाद्देनांवाचंनिर्हंतुंनिर्गमयितुंनशेकुरसुरपुरोहितौसैषायज्ञपा
त्रगताअसुरघ्नीवाक्तयास्मयासमहननादुदगच्छतिसर्वंयज्ञपात्रध्वनेरसुरराक्षसादिनि
वृत्तिहेतुतांप्रतिपादितामुपसंहरतिसयस्येतिविहितंसमाहननमनूद्यमंत्रंविधत्तेस
समाहंतीति॥मधुजिह्वइतिविशेषणस्याभिप्रायमाहसदेवेभ्यइति॥सखलुदेवानांम
धुजिह्वोमधुरवागासीत्॥जयःहेतुत्वाद्सुरेभ्यस्तुविषवागासीत्पराजयःहेतुत्वात्॥
एवंचमधुजिह्वइतिविशेषणस्यायमभिप्रायः॥देवानांयादृशआसीःनोस्माकंतादृशोभ
वेतिइषमूर्जमित्यादिमंत्रशेषस्यस्पष्टार्थतामाह॥नात्रेतिअत्रास्मिन्मंत्रेकिमपितिरोहि
तंनैवास्ति॥अतोनव्याख्यायतइत्यर्थः॥अथसमंत्रकंशूर्पादानंविधत्ते॥अथेति॥शूर्पस्य
वर्षवृद्धत्वमुपपादयति॥यद्धिनडानामिति॥जलप्रांतेवर्तमानास्तृणविशेषानडाःनडादी
निहिद्रव्याणिशूर्पस्योपादानभूतानिवर्षमुदकवृष्टिरेवह्येतानडाद्योषधीर्वर्धयति॥अ
तोवर्षवृद्धत्वाच्छूर्पस्यवर्षवृद्धमसीतिहिव्यपदेशः तस्मिन्शूर्पेअवहतानांव्रीहिणांप्रक्षे
पंविधत्ते॥अथहविर्निर्वपतीति॥निर्वपतिउलूखलान्निष्कृष्यप्रक्षिपतीत्यर्थः॥हेहवि
र्वर्षवृद्धंचांशूर्पंप्रतिवेत्तुआत्मनउपर्यवस्थानंजानात्वितिमंत्रार्थः॥हविषोवर्षवृद्धत्वमुप
पादयति॥वर्षवृद्धाउहीति॥व्रीहियवयोरसतरोहितविषउपादानं॥व्रीहिभिर्यजेतयवैर्य
जेतेतिविकल्पेनयागसाधनत्वश्रवणात्॥व्रीहियवाद्योषधयश्चवृष्ट्यावर्धंतइति

प्रसिद्धमित्यर्थः॥ प्रतित्ते इति तस्याभिप्रायमाह॥ न संज्ञामिति॥ स्त्वर्पह विषोरन्योन्य
हिंसा मा भवेदिति शूर्पाय चरुपात्रह्व विषेच संज्ञां संज्ञानं समानत्तानत्वमेव मंत्रो वदती
त्यर्थः॥ तुषाणामपनयनं समंत्रकं विधत्ते॥ अथेति॥ तुषाणां राक्षसभागत्वात्तैस्त
निरसनं विधत्ते॥ अथ तुषानिति॥ प्रहंति प्रक्षिपति॥ एतन्मंत्रद्वयस्य प्रयोजनमाह॥
तन्वाष्ट्रा इति॥ वितुषीकृतानां तंदुलानां व्रीहीणां च पृथक्करणं विधत्ते॥ अथेति॥
मंत्रगतवायुशब्दार्थमाह॥ अयं वा इति॥ तस्य विवेचनसामर्थ्यमुपपादयति एष वा इति
तत्तस्मात्सर्वस्यास्य विवेचकत्वात् एष एव वायुः एतान्व्रीहीस्तंदुलांश्च विविनक्ति पृथ
क्करोति अतस्तस्यार्थनं युक्तं इत्यर्थः॥ सपदे तदित्यादि॥ यदा यस्मिन्काले एते व्रीहि
तंदुलाः एतद्विवेचनं प्राप्नुवंति तस्मिन्समये पत्रयस्यां पात्र्यां अधि उपरि एतान् पविन
क्ति॥ तसा व्रीगतस्य हविषः समंत्रकमनुमंत्रणं विधत्ते अथेति॥ यथा चैतेन तंदुलाः अ
च्छिद्रेण छिद्ररहितेन पाणिना सुप्रतिगृहीताः शोभनं प्रतिगृहीता भवेयुः तथा प्रति
गृह्णामीति मंत्रार्थः॥ फलीकरणं विधत्ते॥ अथेति॥ तस्य त्रित्वं प्रशंसति त्रिरदिति स
वनत्रयादिरूपेण त्रिरावृत्तो हि यज्ञः अतस्तदनुसारेण फलीकरणमपि त्रिष्कृत्वः क
र्तव्यमित्यर्थः॥ तस्मिन्फलीकरणे शाखांतरीयं मंत्रविधिमनुवदति॥ तद्वै करतीति॥ तं
निषेधति तदु तथेति॥ एतदुपपादयति॥ आदिष्टं वा इति॥ अग्नये जुष्टं गृह्णामीति २३

एवमग्न्यादिदेवतायैआदिष्टमेवैतद्धविर्भवतिअत्रतुदेवेभ्यःशुंध्यध्वमित्यनेनमंत्रेण
एतद्धविर्वैश्वदेवंविश्वदेवसंबंधिकरोतिअतोदेवानांएतन्मंत्रप्रयोगेसमर्दंपरस्परं
कलहंकरोतिअतोवैश्वदेवत्वापादकंमंत्रंपरित्यज्यतूष्णीमेवफलीकर्त्तव्यमितिनिग
मयतितस्मादिति॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥पुमर्थांश्चतुरोदेयाद्वि
द्यातीर्थमहेश्वरः॥१॥ब्रह्मांडंगोसहस्रंकनकहयतुलापूरुषान्स्वर्णगर्भंसप्ताब्धी
न्पंचसीरींत्रिदशतरुलताधेनुसौवर्णभूमीः॥रत्नोस्रांरुक्मवाजिद्विपमहितरथः
सायणःसिंगणार्योव्यश्राणीद्विश्वचक्रंप्रथितविधिमहाभूतयुक्तंघटंचधान्याद्रिंध
न्यजन्मातिलमयतुलाःस्वर्णजंवर्णमुख्यःकार्पासीयंरूपावान्गुडकृतमजडोराजतं
राजपूज्यः॥आज्योत्थंप्राज्यबुद्धिर्लवणजमनघःशाकरंचार्कतेजारत्नाढ्योरत्नरूपंगि
रिमकृतमुदापात्रसात्सिंगणार्यः॥ ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्ग
प्रवर्त्तकश्रीवीरहरिहरमहाराजसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीये
वेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणभाष्येप्रथमकांडेप्रथमेध्यायेचतुर्थब्राह्मणं॥
समाप्तश्चप्रथमोध्यायः॥१॥यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत्॥निर्ममेतम
हंवंदेविद्यातीर्थमहेश्वरं॥२॥एवंप्रथमेध्यायेव्रतोपायनादितंडुलकरणांतंप्रयो
गजातमुक्तं॥अथद्वितीयेकपालोपधानादिरभिधीयते॥तत्रकपालोपधानपेषणयो

युगपदनुष्ठानं विधत्ते ॥ सवा इति ॥ अन्यतरऋत्विजां मध्ये एक आग्नीध्रादिः सकपा
लानामुपधाता अन्यतरोऽध्वर्युः स पेषणार्थं दृषदुपले उपदध्यात् ॥ उक्तं कर्तृभिर
मुपदयति ॥ तद्वा इति ॥ एककर्तृकत्वे हि पर्यायेणानुष्ठानं स्यात् ॥ एतच्चोभयं सहानु
25 ष्ठेयं ॥ अतो भिन्नावेव कर्तारौ युगपत्कुर्यातामित्यर्थः ॥ एतत्सहानुष्ठानमुपपादयि
तुमनुवदति ॥ तद्यदिति ॥ तदुपपादयति शिरो हेत्यादिना पुरोडाशस्य प्रतिज्ञातं यज्ञ
शिरस्त्वं संपादयति ॥ सयान्येवेति ॥ मस्तिष्क एवेति शिरःकपालांतर्गतं मांसं मस्तिष्कः ॥
तद्वा इति तदेतत्कपालमस्तिष्करूपं मिलितं सत् शिरःसंज्ञकमेकमंगं प्रसिद्धं लोके
तथात्रापि शिरःकपालमस्तिष्कसंस्तुतयोः कपालपिष्टयोः सहप्रयोगात् पुरोडाशात्म
कस्य यज्ञसिरसः एकीकरणं संस्तुतौ इत्यभिप्रायः ॥ तत्र कपालान्युपदधेतः कृत्समाह ॥
स उपवेषमिति अंगारविभजनार्थं काष्ठमुपवेषः धृष्टिरसीत्याद्यं निर्वक्ति सयदिति ॥ धृ
ष्णुवेति क्रियाविशेषणं ॥ त्रिधृषा प्रागल्भ्य इत्यस्मात् धृष्णोऽसनेनेति धृष्टिरिति
करणे क्तिन्नित्यर्थः ॥ अत एवैतदुपवेषस्य संज्ञांतरं ॥ तथा चान्यत्र श्रूयते ॥ धृष्टिर्वा
उपवेष इति ॥ अथैतस्योपवेषनाम निर्वचनं ॥ अथ यज्ञ एतेन काष्ठेन यदंगारादि
कमुपालभते प्राप्नोति तदेतदेनेनोपवेवेष्टीव ॥ विष्लृ व्याप्ताविति अस्मात्करणसाधनो
घञ्ं तत उपवेषशब्दः ॥ अग्निगताभ्युध्यंशस्य निरसनं विधत्ते तेनेति ॥ प्राच इति

विधेयविशेषणंग्राग्निगातानीत्यर्थः॥मंत्रगतयोरामात्क्रव्याच्छब्दयोर्विवक्षितम
र्थमाह॥अपंवाइति॥आममपक्वमत्तीत्यामात्मनुष्याणामोदनपाकादिहेतुरग्निः॥
क्रव्यंपललमत्तीतिक्रव्यादितिशवदाहकोग्निःएवमयज्ञियमग्निंमंत्रेणनिर्वर्त्य
शुद्धादग्नेःपुरोडाशश्रपणार्थमंगाराहरणंविधत्तेअथेति॥आस्कौतिविभज
तीत्यर्थः॥स्कुञ्आप्रवणइतिधातुःइत्थंकुर्वतामभिप्रायमाहयइतिदेवान्यज
तीतिदेवयाइयोग्निःतस्मिन्हविःश्रपणादिकंकरवामहाइत्यनेनाभिप्रायेणेत्य
र्थः॥तस्मिन्नंगारेमध्यमकपालस्योपधानंविधत्तेतमभिनि॥अंगारस्योपरिवि
हितंकपालोपधानंप्रशंसतिदेवाहवाइति॥नेन्नइतिनोस्माकंहविषोधोभागे
नैवराक्षसादयउपोत्तिष्ठेयुरित्यनेनाभिप्रायेणअंगारस्योपरिकपालोपधानंकृ
तवंतइत्यर्थः॥एवंसस्कृतभयनिवृत्तिमाह॥अग्निहशितिआदेवयजमितिमंत्रेण
स्थापितस्यैवांगारस्योपरिकपालोपधानंप्रशंसतितद्यदिति॥यजुषामंत्रेणसंस्कृ
तत्वाद्देषएवहिकपालोपधानेमुख्योनान्यइत्यर्थः॥विहितमुपधानमनूद्यमंत्रवि
धत्ते॥सउपदधातीति॥पृथिवीदृंहेति॥पृथिवीसंबंधश्रवणात्तत्संबंधिरूपेणै
तदेवकपालंदृढंकरोतिदृढेनचैतेनकपालेनविद्वेषणंकुर्वंतंशत्रुमवबाधते॥एतन्मंत्र
शेषमनूद्यव्याचष्टेब्रह्मवनीति॥बह्वीवाइतीत्यादि॥यजुःषुयजुर्मंत्रेषुबहुविधाख

त्वाशीः फलप्रार्थना॥ अतो बहुविधं ब्रह्मक्षत्रादि समं जनमनेन प्रतिपाद्यत इत्य
र्थः॥ मंत्रगतयोर्ब्रह्मक्षत्रशब्दयोः लक्षणया तद्वीर्यपरत्वं विवक्षितमिति व्याचष्टे॥
उभे वीर्ये इति भूमा वा इति॥ समानं ज्ञायंत इति सजाता ज्ञातयः तेषु च बहुभावस्य द
र्शनात् धर्मिवाचिना सजातशब्देन तद्धर्मो विवक्षित इत्यर्थः॥ अभिचरतो विशेषं
वक्तुं मुक्तं निर्लेपपक्षमनुवदति उपदधामि भ्रातृव्यस्येति तमेव विशेषं दर्शयति॥
यद्यु अभिचरेदिति॥ अभिचरणपक्षे भ्रातृव्यस्य वधायेति स्थाने अमुष्य वधा
येति शत्रोर्नाम षष्ठ्यंतं निर्दिश्य ब्रूयादित्यर्थः॥ उपहितस्य कपालस्योपरि अंगुल्या
अभिनिधानं विधत्ते अभिनिहितमेवेति दक्षिणहस्ते नान्यस्यांगारस्याहरणं वि
धत्ते॥ अथेति॥ नेदिंगेत्यादि यदि सव्यपाण्यंगुल्या अभिनिधानं न कुर्यात् तदा इ
हास्मिन्कपाले उपर्यंगारनिधानात् पुरस्तादेव राक्षसाः प्रविशेयुः नैव तथा स्यादित्यं
गुल्या अभिनिहितमेव भवेदित्यर्थः॥ तथा सत्युक्तदोषनिवृत्तिमाह ब्राह्मणो हीति॥
अग्निर्यथा दाहे न रक्षांसि हिनस्ति एवं ब्राह्मणोपि मंत्रसामर्थ्येन तेषां हिंसकः॥ अ
तोंगाराध्यूहनपर्यंतं अंगुल्याभिनिहितमेव भवेदित्यर्थः॥ समंत्रकं कपालस्योपर्यं
गाराध्यूहनं विधत्ते अथेति॥ नेदिह पुरेति॥ पुरोडाशाधिश्रयणात्प्रागित्यर्थः॥ अन्य
त्पूर्ववत्॥ पार्श्वास कपालस्योपधानं विधत्ते अथेति॥ मध्यमकपालस्योपधानानंत

यमथशब्दार्थः॥अन्यत्सर्वंपूर्ववद्व्याख्येयं॥मध्यमकपालात्पूर्वदेशेस्थाप्यस्यक
पालस्योपधानंविधत्तेअथयदितिदिवएवरूपेणेतिदिवःसंबंधिनारूपेणैतत्तृती
यंकपालंदृढीकरोतीत्यर्थः॥दक्षिणभागस्थितस्यकपालस्योपधानंविधत्तेअ
थयदिति॥मंत्रस्यतात्पर्यमाह॥सयदित्यादिना॥पूर्वैर्हित्रिभिरुपहितैःकपालैः
पृथिव्यादिलोकत्रयसत्कारणात्तृशब्दोर्बाधःप्रतिपादितः॥इदानींतुइमांस्त्रींलो
कानतिक्रम्ययच्चतुर्थंस्थानंतदस्तिवानवेतिसंदिग्धमेवलोकत्रयवत्प्रसिद्ध्यभा
वात्॥अतोमंत्रेलोकवाचिशब्दविशेषंपरित्यज्यविश्वाभ्यस्त्वाशाभ्यइतिसर्वश
ब्दपर्यायस्यविश्वशब्दस्यप्रयोगात्संदिह्यमानात्सर्वस्मादेवस्थानात्द्विषंतंशत्रुंस
यजमानस्तेनचतुर्थकपालोपधानेनबाधतइत्यर्थः॥विश्वाभ्यइतिमंत्रस्यलोक
त्रयातिरिक्तपरत्वमुपपादयति॥अनद्धावाइत्यादिलोकत्रयातिवर्तिनश्चतुर्थस्य
सद्भावोसद्भावश्चअनद्धावैअस्माकमप्रत्यक्षदिग्वाचिनाविश्वाभ्यआशाइतिपदद्व
येनलोकत्रयव्यतिरिक्तंसकलमेवाप्रत्यक्षंविवक्षितमित्यर्थः॥एवंकपालचतुष्टय
स्यमंत्रेणोपधानंप्रतिपाद्यावशिष्टकपालोपधानेपक्षद्वयमाह॥तूष्णींचैवेति॥
उपहितेषुकपालेषुअंगाराध्यूहनंविधत्ते॥अथेति॥भृगूणामंगिरसामिति॥तपसोय
द्विशेषणंतद्व्याचष्टे॥एतद्वाइति॥यद्भृग्वंगिरसांमहर्षीणांतपोविशेषजनितंतेजः

एतत्खलु अग्न्यादितेजोंतराणां तेजिष्ठं तेजस्वितमं अतिशयेन दीप्तं॥ तेजस्विश
ब्दादिष्ठनि विन्मतोर्लुगिति लुक्॥ एवं वदतो मंत्रस्याभिप्रायमाह॥ सुनप्तानीति॥
26 एतान्युपहितानि कपालानि भृग्वंगिरसां तपसा सुष्ठु अतिशयेन तप्तानि भवे
युरिसनेनाभिप्रायेणेत्यर्थः॥ असन्निसस्तेः पंचमल्लकारे रूपं॥ एवं सहानुष्ठे
ययोः कपालोपधानमभिधाय पेषणं विधातुमारभते॥ अथेति॥ अवहननवत्पे
षणस्यापि कृष्णाजिनस्योपरि कर्तव्यतामभिप्रेत्य तदास्तानं विधत्ते स कृष्णाजिन
मिति॥ सोसावेवेति॥ अवहननप्रकरणे कृष्णाजिनावधूननविधेः शेषोयः प्रा
गाम्नातः तत्राष्टाएवैतदक्षांस्यतोपहंतीति स एवात्राप्यनुषज्य योजयेनीइत्यति
देशः॥ अस्य कृष्णाजिनस्यास्तरणं विधत्ते॥ तदिति॥ इयं वै पृथिव्यदितिरित्यादिना
यस्राम्नानमेतन्मंत्रव्याख्यानं तत्रत्रातिदिशति॥ सोसावेवेति॥ तस्य कृष्णाजि
नस्योपरि दृषदः समंत्रकमुपधानं विधत्ते॥ अथेति॥ धिषणा हीसा दिपेषणीयतं
डुलानां धारणाद्धिषणा॥ पर्वनावयवत्वात्सर्वतीति एतदुभयं प्रसिद्धमिति हि शब्द
योरर्थः॥ गतमन्यत्॥ इयमेवेति॥ पार्थिवेन धारणाख्येन रूपेण योगाद्दृषद्
षदियमेव पृथिवीति स्तुतिः अथ दृषदः पश्चाद्भागे शम्याया उपधानं विधत्ते॥ अथश
म्यामिति॥ उदीचीनमुदगग्रवस्थितमग्रं यस्याः सा तथोक्ता कात्यायनोप्याह स्मपश्चा

छम्यामुपोहस्कदीचीद्दिवइति॥शम्यायाद्युलोकस्तंभनहेतुत्वंवक्तुमंतरिक्षरूपतामाह
अंतरिक्षमेवेति॥द्यावापृथिव्यालनासंस्तुतयोर्दृषदुपलयोर्मध्येवस्थानलक्षणेनरूपे
णांतरिक्षमेवअंतरिक्षेलोकात्मिकेवशम्याइमेचद्यावापृथिव्यौअंतरिक्षेणाहियस्मा
द्विष्टब्धेविविधमधस्तादुपरिष्टाच्चधारितेअतोंतरिक्षात्मिकाशम्यापिद्विदिवःस्कं
भनीरसीतिस्तूयतेदृषदउपरिउपलायाःस्थापनंसमंत्रकंविधत्ते॥अथेति॥पार्व
तेयीत्यादिव्याचष्टेकनीयसीत्यादिनायस्मादेषोपलातिशयेनदृषदःसकाशादल्प
परिमाणाअतएषादृषदोदुहितेवभवति॥दुहिताहिलोकेमातुरल्पीयसीभवति॥त
स्मादेषापर्वसाःपुत्रीपार्वतेयीतिस्त्रीभ्योढगितिढक्॥प्रतितापर्वतीवेत्तितिमंत्रशे
षेणपरस्परहिंसापरिहारार्थंदृषदुपलयोर्मित्रीकरणमर्थइतिव्याचष्टेप्रतिहीति
उपर्यवस्थानलक्षणेनैवरूपेणैषापलाद्यौरेवद्युलोकात्मिकेवेत्यर्थः॥तदेकोदृषदु
पलेसमाहंतीतिप्राक्यत्तयोःसमाहननंविहितंतत्रशम्यायाःसाधनत्वंप्रसंगादुप
पादयति॥हनूएवे॥दृषदुपलयोरुभयत्रावस्थानाद्धनुत्वं॥तन्मध्येवस्थानाच्छम्याया
जिह्वात्वं॥यस्माच्चजिह्वयालोकोवदतितस्माज्जिह्वास्थानीययाशम्ययैवसमाहननं
कुर्यादित्यर्थः॥अथपेषणार्थंदृषदउपरिसमंत्रकंतंदुलप्रक्षेपंविधत्ते॥अथहविरिति॥
मंत्रगतधान्यशब्दस्याभिप्रायमाह॥देवान्धिनवदिति॥धिवि प्रीणनार्थइतिधातुः॥

यष्टव्यानग्न्यादिदेवान्धिनवत्प्रीणयेदित्यनेनैवाभिप्रायेण हि हविर्गच्छते अतो धि
नोतिप्रीणयतीतिधान्यं यत एवमतो देवान्धिनुहीति मंत्रार्थः॥ समंत्रकं पेषणं विध
ते॥ अथेति॥ पिनष्टि संचूर्णयति॥ पिष्लृ संचूर्णन इति धातुः॥ प्रकर्षेण अनिति चेष्ट
27 त इति नासिकाभ्यां बहिर्निर्गच्छन्श्वासरूपो वायुः प्राणः॥ उत् ऊर्ध्वात् अधो देशं प्र
त्यनिति चेष्टत इत्युदानो नासिकाभ्यां देहे पुनः प्रविशन्वायुः॥ अन्नपानादिरसं
विविधं सर्वासु नाडीषु अनिति प्रेरयतीति व्यानः॥ ऊर्ध्वाधोवृत्तिविलक्षणो मध्यवृ
त्तिर्वायुः॥ एतन्मंत्रार्थ उत्तरमंत्रसापेक्ष इति तदुभयं समुच्चित्य व्याख्यातुमुत्तरमंत्रं
विनियुंक्ते॥ प्रोहति दिवो व इति अनेन मंत्रेण कृष्णाजिने प्रोहति चक्षुषे त्वेतीक्षत इ
ति प्राणायेति मंत्रस्याभिप्रायमाविष्कर्तुमुक्तं पेषणमनुवदति॥ तद्यदिति॥ अमृ
तानां मरणरहितानां देवानां हविर्जस्त्वं प्राणधारणयुक्तमेव सत् अमृतममरणसा
धनं भवति॥ अथैवं सत्येतद्यज्ञसाधनं हविरवहननपेषणाभ्याम् ऋत्विजो मार
यंति॥ तथा सति निर्जीवत्वात्तस्यामृतत्वसाधनं न युक्तमिति भावः॥ मंत्रप्रयोगेना
णास्य परिहारं दर्शयति॥ स यदाहेति॥ पेषणसमये प्राणाय त्वेत्यादि मंत्रं प्रयुंजानः
प्राणोदानेव पुनरस्मिन्हविषि स्थापयतीत्यर्थः॥ गतमन्यत्॥ एतानि जीवन इत्यादि॥
एतानि प्राणोदानधारणादीनि जीवतः पुरुषस्य लिंगानि एवमनेन मंत्रप्रयोगेण प्रा

णोद्वानादिस्थापनेसतिहविरपिसजीवमेवेतियुक्तंतस्यामन्तत्वसाधनमित्यभिप्रा
यः॥पिंषंतीति॥एवंसमंत्रकमध्वर्युणापेषणेकृतेसतियजमानपरिचारकाअव
शिष्टंसर्वंचूर्णीकुर्युः॥तथाउपहितानिचकपालानिअभीधत्तेअंगारैःप्रदीप्तानि
कुर्युरित्यर्थः॥पेषणसमयएवाज्यस्यनिर्वापंविधत्ते॥अथैकइति॥यदाचाध्वर्युः
पिनष्टिअथतस्मिन्नेवसमयएकोन्यआग्नीध्रादिरित्यर्थः॥अथएवसूत्रकृतापेष
णाज्यनिर्वापयोःसमसमयवर्तित्वंसूत्रितं॥पिष्यमाणेषुनिर्वपत्यन्योमहीनामित्या
ज्यमितितच्चाज्यंप्रसिद्धदेवतावाच्यग्न्यादिशब्दरहितेनमंत्रेणगृहीतव्यमितिवि
धित्सुराहयवाइति॥यत्खलुहविरग्नयेजुष्टंगृह्णामीत्येवंदेवतायेनिर्दिष्टंभवति
तद्ग्रहणसाधनंयजुश्चयावद्देवत्यंभवतितावद्देवत्यमेवतद्धविर्भवतिआज्यंचसर्वदे
वतासाधारणमितिदेवतादेशानरहितेनैवयजुषागृह्णीयादित्यर्थः॥तथाचाज्य
स्यसर्वदेवतासाधारण्यंसेत्स्यतीत्याहनवाइतिएवमनिरुक्तयजुषाग्रहणमुपपाद्य
तद्विधत्तेतस्मादिति॥देवतानामनिःशेषेणोक्तंयस्मिन्नन्निरुक्तंतद्विलक्षणमनिरु
क्तंतादृशंचमहीनामित्यादियजुःतत्रप्रसिद्धदेवतावाचिपदस्यानुपलंभात्॥अथैत
न्मंत्रंव्याचष्टेमह्यइति॥महपूजायां॥मह्यंतेपूज्यंतेइतिमह्यः॥एतच्चएतासांगवामेकं
साधारणंनामआज्यस्यपयःकार्यत्वात्सयोसीतिविकारेप्रकृतिशब्दइत्यर्थः॥गृही

नम्याज्यप्रकाशकत्वादिति मंत्रः प्रयोक्तव्य इत्याह ॥ एवमुहेति एवमनेनैव मंत्रेणाज्ये
निरुप्तेस्ति तस्य तत्प्रकाशनसमर्थत्वात् यजुषैव तदाज्यं गृहीतं भवतीत्यर्थः ॥
इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यंदिनशतपथब्राह्मणे
28 द्वितीयाध्याये प्रथमं ब्राह्मणः ॥ २ ॥ ६४ ॥ ॥ अथ पितॄणां पिंडकरणार्थं पात्र्यां संवापं
विधत्ते ॥ पवित्रवनीति ॥ सामान्योपक्रमान्नपुंसकनिर्देशः ॥ पवित्रयुक्ते पात्र इत्यर्थः ॥ ए
तदेव विवृणोति ॥ पात्र्यां पवित्रे अवधायेति ॥ सोसावेवैतत्स्येति ॥ सविता वै देवानां प्र
सवितेत्यादिनाम्नहणप्रकरणे आगम्नात एव वाक्यशेषोस्यापि यजुषः शेषत्वेन योज
नीय इत्यर्थः ॥ अथांतर्वेदीति ॥ पघाहवनीये हविःश्रपणं गार्हपत्ये वाडभयथापि वे
दिमध्ये उपविश्यादित्यर्थः ॥ कात्यायनस्तु ब्राह्मणांतराभिप्रायेण विकल्पमाह श्रपण
स्य पश्चादुपविश्यासंतर्वेदि वेति ॥ अथैकइति ॥ एकोन्य आग्नीध्रादिः ॥ उपसृजत्या
भिरितिष्वस्यापि संसर्जनार्था आप उपसर्जन्यः ॥ ताभिः सहागच्छेदित्यर्थः ॥ अथ
तासां तूष्णीमासेचनं विधत्ते ता आनयतीति ताः पवित्राभ्यामित्यादि ॥ आनीयमानास्ताः
समापइति मंत्रेण पिष्टानामुपरि पवित्राभ्यां प्रतिगृह्णीयादित्यर्थः ॥ मंत्रतात्पर्यमाह ॥
सद्येतदिति एतत् एतर्हि एता आनीयमाना आपः पिष्टरूपेणावस्थिताभिरोषधिभिः
संगच्छंते ॥ अतो मंत्रगतौषधिशब्देन तद्विकाराः पिष्टा विवक्षिताः समित्युपसर्गश्च २८

वणाद्योग्यक्रियाध्याहार इत्यर्थः॥एवमपामोषधिभिः संगतिं प्रतिपाद्य व्यतिहारे
इत्यर्थः॥ओषधीनामद्भिः संगतिः प्रतिपाद्यत इत्याचष्टे॥समोषधय इति पूर्व
वदत्राप्योषधिशब्दः पिष्टपरः॥रसशब्देन चापो विवक्षिता इत्याह॥एताः पिष्टा अद्भि
रिति॥आपो हीति उपष्टंभकाप्यावयवयुक्ताः खल्वोषधय आर्द्रा रसवत्यो भवंति॥
अतस्तासामुदकमेव रस इत्यर्थः॥मंत्रगतरेवतीशब्दस्यार्थमाह रेवत्य आप इति॥
रयिर्धनमासामस्तीति रेवत्य आपः धनमूलं मूलत्वं च तासां नदीतटाकादिष्वाव
स्थितानां प्रसिद्धं॥अतो मंत्रे रेवतीशब्देनापो विवक्षिताः॥रयेर्मतो बहुलमिति
संप्रसारणे उगितश्चेति ङीप्॥गम्यंते सर्वैः प्राणिभिः प्राप्यंत इति व्युत्पत्त्या जगती
शब्दोप्योषधिव्याचक इत्याचष्टे जगत्य इति॥सं मधुमतीरित्यादि॥अत्र मधुश
ब्देन माधुर्यरसो विवक्षित इत्याह॥रसवत्य इति॥आसिक्तजलेन पिष्टानां मिश्रीक
रणं समंत्रकं विधत्ते अथेति॥संयौति सम्यङ्मिश्रीकरोति॥युमिश्रण इति धातुः
मंत्रेणास्य कथनेनैतत्संयवनं प्रशंसति॥यथेति॥यथा खल्विमाः प्रजाः यजमाना
य॥षष्ठ्यर्थे चतुर्थी॥यजमानस्य श्रियै संपदर्थं अन्नाद्यर्थं च नियच्छेदेवमेतद
नुकूलमेव तत्सिद्धं संयवनमित्यर्थः॥मंत्रगतजनयत्यै शब्दस्य जननायेत्यर्थः॥
तमुपजीव्य प्रशंसति॥अधिवृक्ष्यन्निति॥अधिवर्जनं पुरोडाशस्याग्नावधिश्रय

णंकरिष्यन्खलुसंयोति॥यथाखल्वधिश्रितःपुरोडाशोग्नेःसकाशाज्जायेतएवं
२८ तदनुगुणमेवतत्संयवनंजनयस्याइतिजननलिंगवतोमंत्रस्यप्रयोगादित्यर्थः॥अ
थद्वेधेत्यादिविभागविधिःकुत्रहविर्द्वयमितितद्दर्शयति॥पौर्णमास्यामितिपौर्ण
29 मासीशब्देनकालवाचिनानकालानुष्ठेयं॥कर्मविवक्षितंतत्रह्याग्नेयोष्टाकपालो
ग्नीषोमीयएकादशाकपालइतिद्वेहविषीइत्यर्थः॥एवंद्वेधाविभज्यविभक्तयोस्त
योर्मंत्राभिमर्शनंविधत्ते॥सपत्नेति॥सखल्वध्वर्युर्यत्रयस्मिन्कालेतद्धविर्द्वयं
पुनर्नसंहरिष्यन्स्यात्संहरणमेकीकरणंतत्करिष्यन्नभवेत्॥तत्तदानीमिदम
ग्नेरित्येकंभागमभिमृशति॥इदमग्नीषोमयोरित्यपरंतावेतौयथासंख्यमाग्ने
याग्नीषोमीयपुरोडाशावित्यर्थः॥कथंपुनरनयोर्द्वित्वंकुत्रवातयोःसंहरणप
र्यावृत्तयेनसंहरिष्यन्नितिविशेष्यतइतितत्सर्वंदर्शयति॥नानावाइत्यादिना
अग्नेर्निर्वापसमयेअग्नयेजुष्टंगृण्हामिअग्नीषोमाभ्यांजुष्टंगृण्हामीतिपृथ
क्पृथक्देवतादेशनाद्ग्रहणस्वनानात्वंअवहननादिसंस्कारेसहैवानुष्ठितेसति
तद्धविरस्मिन्समयेपुनरनेनमंत्रेणयथास्वंविभजतीत्यर्थः॥पुरोडाशकपालस्या
ज्याधिश्रयणस्यचसमानकालतांविवक्षित्वाकर्तृभेदमाहअधिवृणक्तीति॥ए
षोध्वर्युःपुरोडाशमधिवृणक्तिअग्नेरुपरिश्रयतिअथैकआज्यंनिर्वपतीतिप्राग २१

२८

सशब्दपर्यायेणैकत्वशब्देन यज्ञ आग्नीध्र आज्यनिर्वापे कर्तृतया प्रतिपादितः सोत्रासाविदंसे
शब्देन विप्ररूपत्वाच्चिनापरामृश्यते॥ पुरोडाशाधिश्रयणसमये असावाग्नीध्र आज्यम
धिश्रयेदित्यर्थः॥ तदेतदुभयोः सहान्वस्थामुपपादयति अर्द्धो ह वा एष इत्यादिना आज्यंप
त्नशरीरस्यार्द्धभागः उपस्तरणाभिघारयोः प्रयाजादीनां च तत्साध्यत्वात् इतरोर्द्धः पुरो
डाशादिहविः सहाधिश्रयणेन तदर्धद्वयमेकीकृत्य अग्निं प्रापयावेत् अध्वर्युराग्नीध्रस्य चा
भिप्रायः॥ एवमु हेति आज्यहविषोरुभयोः सहाधिश्रयणे सत्यर्द्धद्वयस्यैकीकरणात्
यज्ञशरीरं संधीयत इत्यर्थः॥ विहितमाज्याधिश्रयणमनूद्य मंत्रं विधत्ते॥ सोसाविति॥
इष्यत इतीडिति श्रुतसाइड्शब्देन दृष्टिर्विवक्षितेति व्याचष्टे दृष्टा इति॥ दृष्टाद्दुर्गमस इति
तस्माद्दृष्टाद्दुष्कार्ज्जायमानो यो बलकरोन्नरसो जायते स ऊर्क्शब्देन विवक्षितः अधि
वृणक्तीति अग्नावुपरि वृणक्ति वर्जयति श्रपणार्थं स्थापयतीत्यर्थः॥ यज्ञमेवैतदिति
घर्मोसीति घर्मतादात्म्यस्तवनात् घर्मस्य च सोमयागं गत्वात्तदात्मकमेवैतत्करोति घ
र्मस्य यज्ञस्य वृंजनं सोमेन सदृशमेवैतत्पुरोडाशस्य प्रवृंजनमित्यर्थः॥ तं प्रथयतीति॥ उपहि
तेषु कपालेषु विस्तारयतीत्यर्थः॥ प्रथयस्वेवैनमेतदिति विहितस्य प्रशंसा प्रथयति पृथुं
विस्तीर्णं प्रभूतं करोतीत्यर्थः॥ पुरोडाशस्याभिमतं परिमाणं विधित्सुः परिमाणान्तरं निषेध
ति॥ तं न्वेति॥ सत्रेति निपातोनेकार्थत्वादत्रातिशयार्थः॥ सत्रा पृथुं अतिपृथुं न कुर्यात्
विपक्षे बाधकमाह॥ मानुषं हेति॥ अस्तु मानुषत्वं को दोष इत्यत आह॥ व्यृद्धं वा इति॥ व्यृ

द्धं विगतर्द्धिकमित्यर्थः॥पक्षांतरमुपन्यस्यति॥अश्वत्थापेति॥अयमपिपक्षोदुर्ज्ञानत्वा
न्नसाधुरित्याहकस्तदिति॥स्वाभिमतंपुरोडाशपरिमाणमाह॥यावंतमिति॥यत्परिमा
णविशिष्टमेवपुरोडाशंस्वयंमनसैवातिष्टथुंनमन्येतकिंतुदेवतसोविष्टकृतेडाश्ववदा
नपर्याप्तमेवमन्येतनतत्परिमाणविशिष्टंकुर्यादित्यर्थः॥पुरोडाशस्याङ्गिरभिमर्शनंविध
30 त्ते॥तमिति॥क्षिण्वंतिहिंसं॥२ निक्षिणुहिंसायामिति धातुः विवृहंति विश्लेषयंति॥वृ
हू उद्यमइ ति धातुः शांतिरापइतिदाह तस्मादित्यामनहेतुत्वेनापांशांतिरूपता॥सोभि
मर्शातीत्यादिविहितनाभिमर्शनानुवादेनमंत्रविधिः मंत्रेणाहिंसाप्रार्थनंयुक्तमितिव्या
चष्टेअग्निनावाइतिअभितप्स्यन्तीति॥अभितः सर्वतः तपनंकरिष्यन्तीत्यर्थः॥पर्य
ग्निकरणंविधत्ते॥तमितिपरितोग्निर्यस्यसपर्यग्निः परितोग्निमंतंपुरोडाशंकरोती
त्यर्थः॥तस्यप्रयोजनमाह॥अछिद्रमितिराक्षसादिसंस्पर्शाभावायप्राकारवन्नीरंध्रंअ
ग्निनावेष्टनंकृतवान्भवतीत्यर्थः॥समंत्रकंश्रपणंविधत्ते॥तमिति॥वर्षिष्ठेअधिना
कइतिमंत्रपाठेदेवत्रोदेवान्प्रसेवेतदाह॥वर्षिष्ठेवृद्धतमेनाकेस्वर्गेदेवः सवितास्त्रपय
त्वितिहिमंत्रार्थः॥तथाचतल्लोकवासिनोदेवान्प्रसेवेतद्वचनंदेवमनुष्यपुरुषपुरुमसे
भ्यइतिद्वितीयार्थेत्राप्रसयः॥श्रपणानंतरंतस्याभिमर्शनंविधत्तेतमिति॥अभिमर्श
तोभिप्रायमाह॥शृतमितिशृतंपक्वंजानीत्यर्थः॥आपाकइत्यस्मान्निष्ठायांशृतंपाक ३०

इतिनिपातितंवेदानीतिविदत्तानइत्यस्माल्लोट्युत्तमैकवचनं॥विहितमभिमर्शनमनूद्य
मंत्रंविधत्तेसोभीतीति॥मंत्रगतंभेरिसेनतस्यदृंव्याचष्टेमात्वंभेषीरितिमासंविक्थाइति
माचकंपिष्टाइत्यर्थः॥भयकंपयोःकारणमाहयत्वेति॥यद्वाश्चतइति॥यदायस्मि
न्कालेसपुरोडाशःश्रुतःपक्वोभवति॥अथानंतरमेवतस्योपरिअभिवासयति॥
सांगारेणभस्मनाछादयतीत्यर्थः॥तस्यप्रयोजनमाह॥नेदिति॥प्रयोजनांतरंस
दृष्टांतरमाहनेद्वेति॥नग्नःस्वभावतोविवसनःमुषितश्चोरादिभिरपहृतवसनःता
वुभौयथानिरावरणौशयातेतद्वत्पुरोडाशोऽप्यभिवासनाभावेनिरावणःशयीतनैवतथा
शयीतेत्यभिप्रायेणाभिवासनंकर्तव्यमित्यर्थः॥सोभिवासयतीत्यादिर्मंत्रविधिःअत
मेरुःअतमनशीलःइज्यतेजनेनेतियज्ञःपुरोडाशःसग्लानिरहितोभूत्अतोयजमा
नस्यपुत्रादिरपितथाभूयादितिमंत्रार्थः॥इममर्थंप्रतिपादयति॥नेदेनदिति॥यदि
दमभिवासनंएतदनुएतस्यानंतरमित्यर्थः॥तस्मादितिअतमेरुरितिमंत्रप्रयोगेणा
भिवासनकृततमनाभावादित्यर्थः॥पात्र्यंगुलिप्रक्षालनोदकस्यनिनयनंविधत्ते॥अथे
ति॥निर्णिज्यतेशोध्यतेतेनेतिनिर्णेजनंअंगुलिप्रक्षालनंपात्रीनिर्णेजनंचोदकंअ
श्रोजानताहास्यात्त्रितादयस्तेभ्योनिनयेदित्यर्थः॥विहितंनिनयनंस्तोतुमनुवद
ति॥तद्घइति॥ ॥इतिसायणाचार्यविरचितेमाधवीयेवेदार्थप्रकाशेमाध्यंदिन

शतपथब्राह्मणे प्रथमकांडे द्वितीयाध्याये द्वितीयं ब्राह्मणं॥ ॥प्रथमः पाठकः समाप्तः॥
निर्णेजननिनयनस्यास्य भागत्वमुपपादयितुं तावत्तेषामुत्पत्तिमाह चतुर्द्धेत्यादिना॥
पुरा खल्वग्निः शरीरचतुष्टयधारणेन चतुर्विधो बभूव॥ तत्र यमग्निं सोध्वर्युः होत्रा
य होतृकर्मणे प्रावृणत प्रवृतवान् व्यत्ययेन बहुवचनं॥ यद्वा सुपां सुपो भवंतीति त
च्छब्दाज्जसः स्थाने सुः ते देवा इत्यर्थः॥ सोग्निः प्राधन्वत् प्रागच्छत्॥ अग्निर्यत इत्यर्थः॥
धवि गत्यर्थ इति धातुः॥ अथ योयमित्यादि एवं त्रिष्वप्यग्निषु प्रगतेषु अथानंतरं भा
वी योयमिदानींतनश्चतुर्थोग्निः सोयं भीषा पूर्वाग्निवन्मरणभयेन निलिल्ये निलीनो
तर्हितो बभूव॥ स निलीय चापः प्रविवेश तमप्सु प्रविष्टं देवा अन्विष्य ज्ञात्वा सहसैव ब
लाद्धानिन्युः आजह्रुः स च बलाद्धानीयमानोग्निरपो भिलक्ष्य निष्ठेव ष्ठीवनं कृतवान्
ष्ठिवु निरसन इत्यस्यालिट्यकेनाभिप्रायेण ष्ठीवनमिति तं दर्शयति॥ हे आपः या यूयं
भीतस्य मम अप्रपदनं स्थ अनाश्रयभूताः स्थ याभ्यश्च वः पंचम्यर्थे चतुर्थी युष्मत्स
काशात् अकाममिच्छारहितं मां बलान्नयंति ता यूयमवक्षूताः स्थ ष्ठीवनेन दूषिता
भवतेति यथा लोके परैः प्रार्थितं कार्यं कर्तुमक्षमः ष्ठीवनेन निंदते तद्वदपां निंदा विवक्षि
ता तत इत्यादि ततो निष्ठीवनलक्षणवीर्यधारणात् ताभ्योद्भ्यः सकाशात् त्रितादिसंज्ञका
आप्त्याः उत्पन्नाः अद्भ्यो जातत्वाच्च तेषामाप्त्या इति संज्ञा॥ अथ तेषां पात्रीनिर्णेजनोदकं भा

गहस्यैतत्प्रतिपादनायाह ॥ तदिंद्रेणेति यथेदानीं ब्राह्मणः पुरोहितो देशाधिपतिं राजा
नं अनुसृत्य सञ्चरति तद्वद्देवतैस्त्रितादयोयींद्रेणसार्द्धं तदनुसारेणावस्थिता इत्यर्थः ॥ स
चेंद्रो यत्र यस्मिन्समये सोमपानादिसाधनैः त्रिभिः शिरोभिरुपेतं त्वष्टुः पुत्रं विश्वरू
पं जघान तस्मिन्समये नैत्रितादयोपि तस्य वध्यस्य कर्मणि षष्ठी तं वध्यं वधार्हं विदां
चक्रुर्ज्ञातवंतः ॥ उषविदजागृभ्योन्यतरस्यामिति विदेर्ज्ञानार्थादाम्प्रत्ययः ॥ अनंत
रं चैनं विश्वरूपं त्रित एवेंद्रसहायार्थं जघान ॥ इंद्रश्च तद्धननजनितात्पापात्समुच्य
तज्ञतिमुक्तोभवत् ॥ तत्र हेतुमाह ॥ देवो हीति ॥ यस्मात्सइंद्रो देवः अतोस्मिन्पापसं
श्लेषो न युक्त इत्यर्थः ॥ एवं विश्वरूपहननानंतरं जनैः कृतं संवादं दर्शयति ॥ उपैवे
ति ॥ ये खल्वस्य वध्यस्यावेदिषुः ते तु हेति ते लौकिका जना एतदूचुः ॥ एतच्छब्दपरा
मृश्यं दर्शयति ॥ अज्ञासिषुः इमे एनः पापं उपगच्छंतु एवं उपगंतव्यं तदेनः किंरूपमि
ति प्रश्नपूर्वकमाह ॥ किमिती ति ॥ एषु त्रितादिषु तद्विश्वरूपवधजनितं एनः यत्तदेव य
देनो मृष्टां मृजीत अश्लेषयदित्यर्थः ॥ अतो यदेषां त्रयाणां पात्री निर्णेजनादि निनय
नं एतत् एतेन एषु त्रितादिषु तद्विश्वरूपहननजनितमेनो यत्तो विमृष्टं संश्लेषयति त
स्मादवहननपेषणादिजनितस्यैनसो रूपं पात्र्यादिनिर्णेजनमास्ते ॥ म्योनिनेयमित्य
र्थः ॥ अथ तस्यैनसस्तैरपि कृतां निष्कृतिं दर्शयन् दक्षिणावतैव यागेन यष्टव्यं नादक्षि

णेनेतिप्रसंगादाह॥तउहेति॥वयमपीदमेनःपरःपरस्तादन्यत्राधारांतरेऽजस्मत्तोनि
नयामेतियोजना॥कमभीति॥कंपुरुषमभिलक्ष्येत्यर्थः॥यएवदक्षिणारहितेनहविषा
यजेतनतस्मिन्नितिशेषः॥अदक्षिणयागनिषेधंविपक्षबाधोपन्यासेनोपपादयति॥
32 आस्रेधिति॥म्रष्टइतिम्रज्जूशुद्धाविसस्माल्लुङ्॥अदादित्वाच्छपोलुक्॥कानतर्हिदर्शपू
र्णमासयोर्दक्षिणेतितामाहतनइति॥दर्शपौर्णमासिकंहविर्दक्षिणारहितंनेवभवे
दित्यन्वाहार्यरूपांदक्षिणामकल्पयन्नित्यर्थः॥अन्वाहरतियत्तसंबंधिदोषजातंपरि
हरत्यनेनेतिव्युत्पत्त्यान्वाहार्योनामर्त्विग्भ्योदेयओदनः॥तथाचतैत्तिरीयकं॥यद्वैयत्त
स्यक्रूरंयद्विलिष्टंतदन्वाहार्येणान्वाहरतितदन्वाहार्यस्यान्वाहार्यत्वमिति॥तन्नातेति॥
तत्रास्मानांनिनयनंपृथक्पृथगसंसृष्टमेवकर्तव्यं॥तथासत्येभ्यआस्रेभ्योसमदंअक
लहंकरोतिसंसर्गेहिमदीयंत्वदीयमितिकलहःस्यादित्यभिप्रायः॥तत्स्योदकस्यांगा
रेणप्रतपनंविधत्ते॥तदभीति॥तथासत्येषांतज्जलंशृतंपक्वंभवतीत्यर्थः॥विहितंनि
नयनमनूद्यमंत्रंविधत्तेसइति॥एवंसंस्कृतंपुरोडाशंपशुत्वेनस्तौतिपशुर्हैतिअस्यप
शुरूपतामुपपादयितुमितिहाससमुदाहरति॥पुरुषंहेतिमेधोपचक्रामेति॥यज्ञियः
सारांशोमेधः॥तस्यसंतप्तस्यपुरुषस्यसकाशादपक्रांतोबभूवेत्यर्थः॥सदमामिसादि
एवंपुरुषाश्वादिपशुष्वालब्धेषुततस्ततोनिष्क्रांतःसमेधःअंततइमांपृथिवींप्रविवेश

न्। तंमेधंपृथिवीखनंतोविदारयंतइवान्वीषुर्देवाअन्वैच्छन्॥ इषुइच्छायामित्यस्मा
च्लिङ्॥ ईदृग्विधंयंमेधंपृथिव्यांदेवाअलभंत। ताविमौव्रीहियवौ। सएवमेधोव्रीहिय
रूपेणपरिणतइत्यर्थः॥ तस्मादपीत्यादि। तस्मान्मेधपरिणामरूपत्वादेवेदानीमपितौ
व्रीहियवौमेधवत्कर्षणलक्षणेनलभंतेकर्षकाः। अतःखननप्राप्यत्वदर्शनात्मेध
परिणामरूपत्वंव्रीहियवयोःस्वध्यवसानमित्यर्थः॥ एतज्ज्ञानस्यफलमाहसयावदिति
सइतिपूर्ववदर्थःएकवचनं॥ अस्ययजमानस्यतएतेपुरुषादयःसर्वेपशवआ
रि लब्धाःसंतोयत्प्रमाणविशिष्टवीर्यवद्धविःस्युर्भवेयुःअस्यव्रीहियवयोःसर्वपशुसार
त्वविदुषोयजमानस्यतन्निष्पादितंपुरोडाशादिकंहविःतावद्वीर्यवद्धविरेवभवति॥
एवंसर्वपशुसारत्वात्पुरोडाशःपशुरूपएवसंस्क्रियतइत्यर्थः॥ इत्थंसर्वपशुसारतया
पुरोडाशस्यपशुत्वंप्रतिपाद्यसंपत्त्यापितद्दर्शयति॥ अत्रोसेति॥ लोमत्वगादिपंचाव
यवयोगात्पांक्तःपशुरितियदाङ्कुरभिन्नाःसापांडुःकृसंपदत्रापिपुरोडाशेविद्यतइत्यर्थः॥
नामेवसंपत्तिंदर्शयति॥ यदेत्यादिना॥ यदाखलुपुरोडाशस्यपिष्टावस्थाअथानंतरमेवपि
षुलोमसंपत्तिःलोमवत्पिष्टानांसूक्ष्मत्वाद्बहुत्वाच्च॥ यदाखलुसंयवनार्थमपआनयति
अथतस्मिन्समयेपुरोडाशस्यत्वग्भवति॥ त्वचीवश्लक्ष्णीभावदर्शनात्संयवनावस्था
यांमांसधातुसतिः॥ संयवनावस्थेस्थेपुरोडाशस्यलौकिकमांसस्यचसाम्यमाहसंततएवेति॥

शृतावस्थस्यपुरोडाशस्यास्थ्युत्पत्तिः॥तामुत्पत्तिंलौकिकास्थिसादृश्येनप्रतिपादयति॥दा
रुणइति॥शृतावस्थोहिपुरोडाशोदारुणःकठिनइवतस्मिन्समयेभवति॥लौकिकमप्य
स्थिकठिनं॥अतःशृतावस्थायांपुरोडाशोस्थिमान्भवतीत्यर्थः॥उद्वासयिष्यन्निति॥
33 उद्वासनकालेयत्पुरोडाशस्याभिघारणं॥अस्थ्यंतर्गतंमज्जाख्यंधातुमेवतेनस्था
पयतीत्यर्थः॥उक्तामेवपांक्तत्वसंपत्तिंनिगमयतिएषोइति॥एषाउएषैवदेवैराल
ब्धानामपक्रांतमेधानांपुरुषादिपशूनांपरिणामविशेषंदर्शयन्तस्यप्रसंगादम
श्यतामाह॥सयमित्यादिना॥सइतिपूर्ववद्बहुवचनस्थानेएकवचनंतेदेवाइत्यर्थः॥
एतेषामितिकिंपुरुषादीनांपशूनांपरिमांसंनाशितव्यंतत्रहेतुमाहअपक्रांतेति॥अ
पक्रांतमेधत्वेनायज्ञियत्वादित्यर्थः॥ ॥इतिसायणाचार्यविरचितेमाधवीयेवेदा
र्थप्रकाशेमाध्यंदिनशतपथब्राह्मणेप्रथमकांडेद्वितीयाध्यायेतृतीयंब्राह्मणं॥
अथवेदीकरणार्थंस्फ्यादानंविधित्सुःस्फ्यस्यवज्ररूपत्वंवक्तुमितिहासमाचष्टे॥
इंद्रोहेति॥तस्यचतुर्द्धाविभक्तस्यवज्रस्यस्फ्यस्तृतीयोंशः॥न्यूनाधिकराहित्येनतृ
तीयांशत्वज्ञानंदुर्लभमित्यभिप्रेत्यपक्षांतरमाह॥यावद्देतितृतीयाद्भागान्न्यून
मधिकंवायावदेवकिंचित्तावानेवस्फ्यइत्यर्थः॥एवंयूपस्तृतीयमित्यादौयोजना॥
चतुर्थभागस्यपरिणामप्रकारमाह॥अथयत्रेति॥तच्छकलइति॥नत्तत्रदेशे॥ २२

प्रहृतः स वज्रः शकलो भूत्वा अशीर्यत शीर्णोऽभूत्॥ स च शीर्णो भूमौ पतित्वा शरात्म
नापरिणत इत्यर्थः॥ शरशब्दं निर्वक्ति तस्मादिति॥ चतुर्द्धाभवनमुपसंहरति॥ एवमि
ति॥ तेषां वज्रावयवानां स्फ्यादीनां ब्राह्मणराजन्ययोर्व्यवस्थया विनियोगमाह॥ तत
इति॥ राजन्यबंधवः क्षत्रियजातीयाः संन्याघेयुद्धे चरंतीत्यनुषंगः॥ द्वाभ्यामिति संग
स्रोक्तं विभजति॥ यूपेन चेति॥ अथ तस्य स्फ्यादानं विधत्ते॥ स यदिति॥ तच्छब्दयच्छ
ब्दाभ्यां प्रसिद्धिरभिधीयते॥ स प्रसिद्धोऽध्वर्युरित्यर्थः॥ एवमेवैष इत्यस्यार्थः॥दि॥ वृत्रव
धार्थमिंद्रवत् विद्वेषणशीलं पापरूपं शत्रुं हंतुं स्फ्यलक्षणं वज्रमुद्यच्छतीत्यर्थः॥ विहित
मादानमनूद्य मंत्रं विधत्ते॥ तमाददत इति॥ देवस्य त्वेति मंत्रस्य प्रागाम्नातमपि ब्राह्मणं
विधेयविशेषं योजयितुं पुनराम्नायते॥ सविता वा इत्यादिना॥ तस्वाभ्यामिति देव
संबंधिभ्यामेव बाहुभ्यां स्फ्यादानं न तु स्वकीयाभ्यां युक्तं चेत्तदित्याह॥ वज्रो वा इति ए
ष स्फ्यो वज्रस्तत्परिणामत्वात्॥ नहि मनुष्यस्तद्वज्रं भर्तुं शक्नोति अतो देवस्येति मंत्रं प्रयुं
जानस्तं स्फ्यलक्षणं वज्रं सवित्रश्व्यादिदेवताभिरेवाददते आदानं कृतवान्भवति॥ अध्वरो
वा इति॥ ध्वरो हिंसा प्रसवायो न विद्यतेऽस्मिन्निति अध्वरशब्दस्य यज्ञोऽर्थः॥ अध्वरं करोतीत्य
ध्वरकृत् तथा च यद्धस्तकृतं देवस्य आददर इत्युक्तं भवतीत्यर्थः॥ संस्पशेवेनमिति वक्ष्यमाणं
मंत्रं जपतीति यत् एतेन एनं स्फ्यं संश्यति सम्यक् तनूकरोति तीक्ष्णीकरोत्येव॥ शोतनूकरण

इति धातुः॥ अतः स्यनीसो कारलोपः॥ विहितं जपमनूद्य मंत्रं विधत्ते स इति॥ इंद्रस्य द
क्षिणो बाहुरसीति शौर्येन वीर्यवान्‌ त्त्वाद्सुरवधकारित्वाद्‌ अतः एस एव त्वमसीति स्य
स्य स्तुतिरिति व्याचष्टे एष वा इति द्वितीयं भागमनूद्य व्याचष्टे सहस्रभृष्टिरिति स
35 हस्रं भृष्टयोऽस्य यो यद्वा भर्जनानि हिंसाविशेषाः शत्रुवधादिषु येन क्रियंते स वज्रः सह
स्रभृष्टिः यः शततेजा अपरिमितदीप्तिस्तादृशो वज्रः स एव त्वमसीति स्य स्तुतिः वज्रस्य
मां प्रसिद्धिं द्योतयितुं वै शब्दः यंतमिति॥ तमुक्तविधं यं वज्रं शत्रुवधार्थमिंद्रः प्राहरत्‌
तमेव तदात्मकमेवानेन मंत्रभागेन करोतीत्यर्थः॥ तृतीयभागमनूद्य व्याचष्टे॥ वायुरसी
ति॥ यस्तिग्मतेजा वायुः स एव त्वमसीति स्तुतिः॥ वायोस्तिग्मतेजस्त्वमुपपादयति॥ एतद्वा
इति॥ योयं वायुः पवतेंऽतरिक्षे चरति एतत्‌ खलु तेजसां मध्ये तेजस्वितमं तेजः॥ इममेवा
तिशयमुपपादयति॥ एयहीति॥ अग्न्यादितेजोंतरं हि कुत्रचिद्देवपरिछिन्नं॥ एष हि वायु
रिमान्सर्वान्लोकाननुक्रमेण तिर्यग्वृत्तिः पवते युगपद्व्याप्नोतीत्यर्थः॥ अस्यप्रयोजनमा
हा॥ संस्यतीति॥ एतत्‌ एतेन उक्तविधवायुतादात्म्यप्रतिपादनेनेत्यर्थः॥ अमुष्य वध इति॥ अभि
चारप्रयोगे द्विषतो वध इत्यस्य स्थाने अमुष्य देवदत्तस्य वध इति शत्रोर्नाम निर्दिश्योदित्यर्थः॥
एवं मंत्रजपातीक्ष्णीकृतेन स्फ्येनात्मनोन्यस्य च संस्पर्शं निषेधति॥ ते नेति हि न सानि हिंसि
तं करवाणीत्यर्थः॥ हिसि हिंसायामित्यस्मात्‌ लोटि रूपं॥ अथ स्तंबयजुर्हरणं विधित्सुस्तस्यात २६

रनिर्हरणलक्षणंप्रयोजनंवक्तुमाख्यायिकामाह देवाश्चेति॥प्रजापतेर्हिद्वेस्त्रियौदितिरदिति
श्चतत्रदितेःपुत्रादेवाःदितेःपुत्राअसुराःअतउभयेपिप्राजापत्याःप्रजापतेःपुत्राःतेपरस्प
रेस्पर्धांकृतवंतः॥यदाखलुतेदेवाअसुरान्जयंतितदोनंतरंक्षणएवएतान्देवानभि
लक्ष्यपुनरसुराउत्तिष्ठंति॥उदोअनूर्ध्वकर्मणीति॥पञ्चदास्तादिहचोर्द्धकर्मत्वादात्मनेपदाभा
वः अथदेवैःकृतंजयोपायचिंतनमुपन्यस्यति॥तेहेति॥अनपजय्यंजेतुमशक्यानेतानसु
रान्केनखलुप्रकारेणपुनरुत्थानरहितंजयेमेत्येवंविचारितवंतइत्यर्थः॥क्षय्यजय्यौश
क्यार्थइतिजयतेर्यतिनिपात्यते॥अथाग्निनोपदिष्टंजयप्रकारंदर्शयति॥सहेति॥नास्मा
कंसकाशात्उदङ्मुखाःसंतःपलाय्यपलायनंकृत्वाअयपपयगताविसस्मात्कोल्पप्॥उपस
र्गस्यायतावैर्त्वविलत्वं॥अग्निनोक्तंवाक्यंसत्यमितिश्रुतिःस्वयमनुवदतिउदंचोहेति॥एव
मुत्तरतोवस्थितानसुराञ्जेतुंअग्निरेवोपायंदेवान्प्रत्युपदिशतीतिसहेति॥इतरइत्यादि॥इतो
स्मादेदिलक्षणात्स्थादुपसंरोत्स्यथउपसंरुद्धान्प्रतिबद्धगतीनसुरान्करिष्यथ॥अथानंत
रमेववयमेभिःपुरोवर्तिभिःपृथिव्यादिभिस्त्रिभिर्लोकैरभिनिधास्यामःअभितःसर्वतोनिरु
द्धगतीन्निहतान्करिष्यामःयद्वाअभितोनितरान्क्षिप्तान्साजितान्करिष्यामःइमान्लो
कानतिक्रम्ययत्चतुर्थंलोकंजातमस्तिअस्माकमप्रसक्षंतेनापिसाजितान्करिष्यामःत
तोनंतरमसुराःपुनर्नसंहास्यंतेसंगतानभविष्यंतिविशीर्णाबाधिताएवभवेयुरित्यर्थः॥

ॐ हाऽ॑गतावितिधातुः इत्थमग्निनोक्तं वाक्यं श्रुत्वात्तथैव तैर्देवैः कृतिं श्रुतिरूपनिबध्ना
तिसोग्निरिति॥ अग्निरुत्तरतः उत्तरस्यां दिशि पर्यैत् पर्यगच्छत्॥ अग्निवाक्येहि चिकी
र्षितार्थोपदेशनाद्भविष्यदर्थवाचिनो लृटः प्रयोगः॥ श्रुतिवाक्ये तु निर्वृत्तार्थप्रतिपा
दनात् भूतानद्यतनवाचिनो लङः॥ प्रयोगइत्येतावान् भेदः॥ तदेतद्दिसा तद्दि॥ यदत्र
स्तंबयजुर्हरणं करिष्यतेएतन्निदानेन मूलकारणेन निरूप्यमाणं सत् देवैः कृतं तज्जद
सुरनिरसनं॥ अतोयत्तविधानकासुरनिरर्हणार्थं स्तंबयजुर्हरणं कर्तव्यमिति विधि
रुन्नेयः॥ सयोसाविति॥ स्तंबयजुर्हरणसमये योसावाग्नीध्रो वेदेरुत्तरतः परीत्य वर्त्त
ते॥ एषनिदानेन मूलकारणेन निरूप्यमाणः सन् अग्निरेव योग्निः पुराअसुरान्निरोद्धुम
मुत्तरतः पर्यैत् तद्वासकएवाग्नीध्र इत्यर्थः॥ नत्र तत्रोपसंरोधकादेवाः तत्स्थानीयऋ
त्विजां मध्येक इति तं दर्शयति॥ तानध्वर्युरिति येनोपायेन पुरादेवा असुरानबाधिष
न तेनैवोपायेन यत्तानुष्ठानसमयेन द्विषाति नोसुराबाधितव्याइति निगमयति॥
तस्मादिति॥ न केवलं स्तंबयजुषोसुरनिर्हरणं प्रयोजनं भ्रातृनिर्हरणमपितस्य योजन
मिति प्रतिपादयति यएवेति॥ अरातीयति अरातिरिति वाचरति उपमानादाचारइति क्य
च् पश्व एनं यजमानं साक्षाद्देवद्वेष्टि बाधते तमुभयविधं शत्रुं॥ अन्यत्सूर्ववत्॥ पृथिव्या
एवसकारात्स्तंबयजुर्हरणं कर्तव्यं नांतरिक्षाद्दरिसभिप्रेत्याह॥ सवाइति॥ पृथिव्यादिभि ३५

स्त्रिभिर्लोकैः तदतिरिक्तेनवान्येन चतुर्थेन लोकेनासुरान्निरस्यन्न सावध्वर्युरस्याः पृथिव्या
एव सकाशात्सर्वंस्तंबयजुर्हरति नांतरिक्षादेः हि यस्मादस्यामेव भूम्यामिमेंतरिक्षादयः सर्वे
लोकाः प्रतिष्ठिताः तस्मात्स्तंबयजुर्हरणस्य प्रथमपर्यायवत् द्वितीयादिपर्यायाणामपि पृथि
व्या एव सकाशाद्धरणं युक्तमित्यर्थः॥ एतदेव व्यतिरेकमुखेनोपपादयति किं हीति॥ यत् यदि
अंतरिक्षं हरामि दिवं हरामीत्येवं स्तंबयजुर्हरेत् तदा किं नाम हरेत् अंतरिक्षद्युलोकयोर्हर्तव्य
स्य स्तंबस्याभावात् न तत्र तद्धरणं संभवतीत्यर्थः॥ तस्मादिति प्रागुक्तनिगमनं॥ स्तंबयजुर्ह
रणार्थं तृणांतर्द्धानं विशिष्टं स्फ्येन प्रहरणं विधत्ते अथेति॥ तृणांतर्द्धानस्य प्रयोजनमाह नेदि
ति॥ तृणांतर्द्धाने हि तीक्ष्णीनस्य रूपापन्नेन वज्रेण पृथिवी सिहिंता स्यात्॥ न हिंसानिरत्तये
प्रहरणसमये तृणमंतर्द्धाय तेन प्रहर्तव्यमित्यमित्यर्थः॥ विहितं प्रहरणमनूद्य मंत्रं विधत्ते॥
सम्प्रहरतीति ओषध्यास्तइति मंत्रभागं व्याचष्टे॥ उत्तरमूलामिति॥ स्फ्यमाददानोध्वर्युरेतां
पृथिवीमुत्तरमूलामुपरिभागावस्थितमूलयुक्तामिव खल्वेतत्करोति अत उत्तरमूलत्वेन प्रहर
णात् हिंसाशंकायां तदभावो नेनमार्थ्यतइत्यर्थः॥ मंत्रगतोषधिशब्दस्य जात्यभिप्रायेणैकव
चनांतत्वेनत्वमभिप्रेत्य व्याचष्टे व्रजं गच्छेति॥ अभिनिधास्यन्नभितो निक्षेप्स्यन् खल्वध्वर्युः एतत्
दसुरजातमनपक्रमि अपक्रमणरहितं इतस्ततो गमनरहितं कुरुते तत् खल्वनपक्रमि य
द्व्रजे गोष्ठं तन्निरुध्यते॥ अतोस्य मंत्रप्रयोगस्य अपक्रमणाभावः प्रयोजनमित्यर्थः॥ वेदिमे

षणमंत्रमनूद्यतात्पर्यमाहवर्षत्विति।अस्यैषष्ठ्यर्थेचतुर्थी॥अस्याःपृथिव्याःसंबंधिनि
यत्रस्थानेवेद्यर्थंखननंतत्क्रूरंनिष्ठुरंकुर्वंतितेनचतांपृथिवीमपघ्नंतिहिंसंति॥अतः
36 खननजनितांहिंसामनेनमंत्रप्रयोगेणशांतिरूपाभिरेवाद्भिःपुनःप्रशमय्यसंदधाती
त्यर्थः॥व्रजंगच्छेत्यादिमंत्राणांकात्यायनःस्पष्टंविनियोगमसूत्रयत्॥व्रजंगच्छेतिपुरीषमा
दत्तेवर्षतुनइतिवेदिंप्रेक्षतेबधानेत्युत्करेकरोतीति॥उत्करेनिधानमंत्रस्याभिप्रायमावि
ष्करोति।देवमेवैनदित्यादिनापरमस्यांपृथिव्यामित्यस्यव्याख्यानंअंधेतमसीति॥सर्वप्रका
शरहितेऽतिशयितेतमसियस्मिन्बद्धोनपुनरावर्ततेतादृशेघोरस्थानइत्यर्थः॥अमुचेइति
अमोचनायेत्यर्थः॥नहिशतसंख्याकैःपाशैर्बद्धःस्यात्सानंमोचयतुमीष्टइत्यभिप्रायः॥
अभिचरतःप्रयोगेविशेषमाह॥यद्युइति॥अनभिचरतःप्रयोगेमंत्रगतस्तमितियः
शब्दस्तस्यस्थानेऽभिचरतोयजमानस्यशत्रुनामद्वितीययानिर्दिश्यमंत्रःप्रयोक्तव्यइत्य
र्थः॥एवंस्तंबयजुर्हरणस्यप्रथमपर्यायमभिधायद्वितीयपर्यायार्थंप्रहरणादिकंसमंत्र
कंविधत्तेअर्थेति॥मंत्रप्रतिपादितमररुवधप्रार्थनमुपपादयति॥अररुर्हेति।अररुर्ना
मअसुररक्षसंसुराणांविरोधिरक्षोबभूव॥रक्षःशब्दादिनसंतादित्युकारःसमासांतः।दे
वदेवइदानींतनोध्वर्युररुपाररुमित्यनेनमंत्रेणपृथिव्याःसकाशादपहंतिव्रजंगच्छेत्यादि
कस्यसर्वस्यद्वितीयपर्यायेप्रयोज्यस्यापिप्रागुक्तएवार्थइत्यभिप्रेत्यानुवदति॥व्रजंगच्छेति॥ ३६

उत्करेन्युप्तस्यस्तंबयजुषोभिनिधानंसमंत्रकंविधत्तेनमिति॥अभिनिदधातिउपरिहस्तनि
धानेनाधस्तात्क्षिपतीत्यर्थः॥मातेपेइतिपतनाभावप्रार्थनंसमर्थयितुंपुरावृत्तमुदाहर
तियत्रवाइतिसदिवमितिसदेवैरपहतोररुःदिवमपिपतिषत्द्दिवंपतितुंगंतुमैछत्॥तथा
विधंपिपतिषुमररहंउत्तरतःपरिगतोग्निरभिदधातूउपरिहस्तनिधानेनाधस्तात्सेरितवा
न्किंब्रुवन्हेअररोदिवंद्युलोकंमापप्तःमाप्राप्नुहीति॥पतृगतावित्यस्माल्लुङिऌदित्वा
दङ्।पतःपुमितिपुमागमःएवमग्निनाभिनिधानेकृतेसतिसोररुदिवंनप्राप्नोत्तद्वदेवे
दानीमप्यध्वर्युःस्तंबयजुर्हरन्अस्माल्लोकान्एनमररुमंतरेतिअंतरितंव्यवहितंकरो
त्तिआग्नीध्रश्चेत्तन्मंत्रकरणकेनोत्करेभिनिधानेनदिवोंतरिक्षात्तमसुरमंतरितंकरो
तीत्यर्थः॥अथतृतीयपर्यायंविधत्तेअथेति॥मंत्रंव्याचष्टेअयंवाइति॥अस्याःपृथिव्याः
संबंधिनंयमिमंमधुरादिरसंसर्वाःप्रजाःउपजीवंतिअयंखल्वस्याःपृथिव्याइप्सःतथा
चहेपृथिवितेतदीयएषरसःदिवंद्युलोकंमापप्तत्॥मापप्तत्तितीममर्थंएषमंत्रोब्रूतइत्य
र्थः॥अस्मिंस्तृतीयेपिपर्यायेव्रजंगच्छेत्यादिकंसर्वंपूर्ववत्प्रयोक्तव्यमित्यभिप्रेत्यपठति
व्रजमिति॥उक्तंसमंत्रकंनिर्हरणमनूद्यप्रशंसतितिसवाइति॥इमेपृथिव्यादयःप्रसिद्धास्त्र
योलोकाःतथाचत्रिष्टुत्तोहरणेनएभिस्त्रिभिरेवलोकैःएनमररुमभिनिदधातिअभि
तोनिक्षिपतिबाधतइतियावत्॥यजुर्मंत्रेणहरणस्यलोकत्रयस्यचसाम्यमाह॥अद्धा

वाइति॥इमेपृथिव्यादयोलोकाइतियत्तद्दृष्टावैप्रत्यक्षमेवखलुयदेतद्धरणसाधनंयजुः
तद्दृष्टोअद्धेवप्रत्यक्षमेवअनुष्ठेयार्थस्यसाक्षात्प्रतिपादकत्वात्अतोयजुषोलोकानांच
प्रत्यक्षत्वसाम्यात्त्रिवारंयजुषाहरणेनलोकत्रयादेवास्याररोर्बाधोयुक्तइतिनिगमयति
तस्मादिति॥अमंत्रकंचतुर्थंपर्यायंविधत्तेतूष्णीमिति॥तस्यप्रयोजनमाह॥सयदिति॥
इमान्प्रागुक्तान्त्रीन्लोकाननतिक्रम्ययच्चतुर्थंलोकजातंतदस्तिवानवेतिसंदिग्धंअसं
तविप्रकृष्टत्वेनानुभवपथानवतारात्॥एतच्चतुर्थहरणात्तेनैवसंदिह्यमानेनलोकजाते
नविद्वेषणंकुर्वन्तंशत्रुमपबाधतेएतदुपपादयितुंतूष्णींहरणस्यलोकत्रयव्यतिरिक्तस्य
चतुर्थस्थानस्यचसाम्यमाहअनद्धावाइतिअनद्धाप्रत्यक्षमित्यर्थः॥तूष्णींहरणमप्यनुष्ठे
यार्थप्रतिपादकमंत्रप्रयोगाभावादस्पष्टत्वेनानद्धाअप्रत्यक्षमेवेति॥ ॥इतिसायणाचार्य
विरचितेमाधवीयेवेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणेप्रथमकांडेद्वितीयाध्यायेच
तुर्थंब्राह्मणं॥ ॥श्री॥इत्थंस्तंबयजुर्हरणंविधायवेदिपरिग्रहंवक्तुमितिहाससुपन्य
स्यतिदेवाश्चेति॥पस्पृधिरेस्पर्द्धांकृतवंतः॥अपस्पृधेथामानृचुरानृहुरितिसंप्रसारण
निपातनस्योपलक्षणत्वमभिप्रेत्यलिट्यपिसंप्रसारणंकृतंस्पर्द्धमानानांतेषांमध्येदेवाः
ततस्तेभ्योअसुरेभ्योनुव्यंअनुगमनंन्यत्कृतिंप्रासाइवबभूवुः॥अथानंतरमेवतेसुराःम
न्यंतेस्म॥किमिति॥इदंजगदस्माकमेवेति॥एवमुक्त्वाकिमुक्तवंतइतिदर्शयतितेहेति॥हं

तेति हर्षेयत एवं देवाः स्पृष्टाः अतो नि अस्मासु हंत वयमिमां पृथिवीं विभजामहे॥ विभज्य
च तां यथाभागमुपजीवामेति॥ एवमुक्त्वा किं कृतवंत इति तदाह॥ तामिति॥ औक्ष्णैः
उक्ष्णोऽनडुहः संबंधिभिश्चर्मभिः उक्षन्शब्दात्तस्येदमित्यणि षपूर्वहन्धृतराज्ञामिस
लोपः तैश्चर्मभिः पश्चात्प्रतीचीं दिशमारभ्य प्रांचः प्राङ्मुखा विभजमाना अभिजग्मु
रित्यर्थः॥ असुरेष्वेवं कृतवत्सु देवाः किं कृतवंत इति तदाह तद्वा इति॥ येनेत्यादि अस्माकं
तूष्णीमवस्थानमनुचितं अस्माभिरपि न द्विषते प्रयतितव्यमिति परस्परमभिमु
खीकृत्येत्यर्थः॥ प्रतिपाद्यते हे देवा यूयं प्रेत गच्छत यो सहध्वमिति यावत्॥ यस्मिन्स्था
ने असुराः पृथिवीं विभजंते तत्स्थानं गमिष्यामः॥ गत्वा च यत् यदि अस्यै षष्ठ्यर्थे चतु
र्थ्यः॥ अस्याः पृथिव्याः संबंधिस्थानं न प्राप्नुयामः ततस्तर्हि वयमभागिनो भवेम यद्य
दि तु प्राप्नुयाम न तदाभागिनः स्याम भवेमेत्यर्थः॥ एवमालोच्य देवैः कृतं दर्शयति॥ त
इति यज्ञात्मकमेव विष्णुं पुरतो धारयित्वा ईयुर्गतवंत इत्यर्थः॥ गत्वा चासुरान्प्रति
किमुक्तवंत इति तदाह ते हेति अस्यां पृथिव्यां नोऽस्मानन्वाभजत संयोजयत नोऽस्मा
कमप्यस्यां भागो भवत्विति॥ असुरैः कृतं प्रतिवचनं दर्शयति ते हेति॥ असूयंत इव
असूयां कुर्वंत इवासहमाना इति यावत्॥ यावंतं देवं विष्णुर्व्याप्य वर्तते तत्परिमाणं
स्थानं युष्मभ्यं प्रयच्छामः॥ इत्यसुरैरभिहिते देवास्तदंगीचक्रुरित्याह वामनो हेति॥

38

विष्णुर्हि नदानीं वामनः खर्वो बभूव ॥ अत एवासुराः तेनाक्रांतं स्थानं प्रयच्छाम इत्यब्रुवन् ॥
अथापि तदसुरैरुक्तं देवान जिहीडिरे नच्यनादरं तं चक्रुः किंतु आद्रियंते स्मेत्यर्थः ॥ हेडृ
होडृ अनादर इति धातुः ॥ आदरणप्रकारमाह ॥ महदिति ॥ विष्णुर्हि यज्ञः अतो यत्तस्सं
मितं स्थानमस्मभ्यं दत्तवंत इति यत्तन्नोस्माकं महदधिकं ॥ एवं विचार्य देवैः कृतं
दर्शयति न इ इति ॥ यज्ञात्मकं विष्णुं प्रांचं प्राविशरसंनिपास दक्षिणतः पश्चादुत्तरतः
श्च गायत्र्यादिछंदोभिः सर्वतः परिगृह्य पूर्वस्यां दिश्याहवनीयाख्यमग्निं प्रज्वाल्य
तेन विश्वासकेन यज्ञेनार्चंतः पूजयंतः श्राम्यंतः कर्मानुष्ठानजनितं श्रमं प्राप्नुवंत
श्चेरुः रूर्वंश्चक्रिरे चरिताश्च तेन च यज्ञात्मकस्य विष्णोराधारभूतेन स्थानेन देवास्ताः सर्वा
मेवेमां पृथिवीं सम्यगलभंत अतो विघते लभ्यतेऽनेनेति यत्तत्स्थानस्य वेदि नामधेयं
निर्वक्ति न यदिति ॥ उक्तं वेधाः सर्वपृथिवीलाभरूपत्वं इदानीं वेदिपृथिव्योस्तादात्म्य
विषयाममभियुक्तप्रसिद्धिमुदाहरति तस्मादिति यत्परिमाणविशिष्टा खलु वेदिः त
त्परिमाणमेव पृथिवीकृत इत्यस्य आहत ऐपेनिहि यस्मात् एतया वेद्या इमां सर्वां पृथिवी
मलभंत अतस्तल्लाभहेतुत्वात् ततो नन्येत्यर्थः ॥ इत्थं पुरावृत्तमुदाहृत्य प्रकृते योजयति ॥
एवं हेति ॥ यथैव हि वेदिपरिग्रहाद्देवा असुरसकाशात् कृत्स्नां पृथिवीमपहृतवंतः ए
वमेवायं यजमानोपि शत्रुसंबंधिनीं सर्वां भूमिमिमे हरति तांश्च शत्रूनस्याः पृथिव्या ३८

निर्भजतिनिर्भक्तान्ज्ञागरहितान्करोतीत्यर्थः॥तस्माद्गायत्रेणेत्यादिभिर्मंत्रैःस्फ्येन
वेदिंदक्षिणतःपश्चादुत्तरतश्चलेखयापरिगृह्णीयादित्यर्थः॥अथवेदेःखननंविधि
त्सुःप्ररूतमितिहासशेषमनुक्रामतिसोममिति॥सयज्ञात्मकोविष्णुःदक्षिणतःपश्चादु
त्तरतश्चछंदोभिःपरिगृहीतत्वात्पूर्वस्यांदिशिचाग्नेरवस्थानादितस्ततश्चलितुमशा
क्यत्वेनग्लानःश्रांतःसन्अपक्रमणमपगमनंनासनजगामअसगतिदीप्त्यादाने
श्विसस्माल्लिविछांदसोभूभावाभावःग्लानस्यतस्यविष्णोरपगमनंनबभूवेत्यर्थः॥
सचसर्वतःप्रतिबद्धोविष्णुस्ततएवतस्मिन्नेवस्थानेओषधीनांमूलान्युपेत्यभूम्यंतर्गतः
सन्मुम्लोचअस्तंगतोदृश्योबभूव॥अनंतरंचतेदेवाःतत्रविष्णुमपश्यंतोवितर्कितवंतः
किमितिविष्णुःक्वकुत्राभूत्तद्यात्मकोयज्ञश्चक्वाभूदिति॥एवंवितर्क्यतेर्निर्णीतमर्थंद
र्शयति॥तेहोचुरिति॥अत्रैवेति॥चतसृष्वपिदिक्षुपरिवृतत्वेनगमनासंभवात्अत्रैव
स्थानेतस्यविष्णोरन्वेषणंकुरुतेत्यर्थः॥इत्थंपरस्परंनिश्चित्यभूमिंखननंतद्द्वतंविष्णुम
न्विष्टवंतः॥अन्विष्यचतंभूम्यंतस्त्र्यंगुलेन्वविंदन्अलभंतयतएवंअतइदानीमपिय
त्ल्लाभायवेदेस्त्र्यंगुलमात्रंखननंनंकर्तव्यमितिविधत्ते॥तस्मादितित्र्यंगुलपरिमाणेन
खातावेदिर्भवेदित्यर्थः॥वेदेस्त्र्यंगुलखननमृषिसंवादेनद्रढयति॥तदुहेति॥पांत्विर्नाम
कश्चिदृषिःखलुसोमयागस्यापिवेदिंत्र्यंगुलखातामेवकृतवान्॥अतोत्रापित्र्यंगुलखाता

39

वेदिर्युक्तेति भावः॥तमिमं पक्षं निषिध्य पक्षांतरमाह तदु तथेति॥स विष्णुरोषधीनां खलु
मूलान्युपेत्यांतर्हितो भवत्॥तस्माद्यावति देशे भूम्यामंतरोषधीनां मूलानि प्रसरंति
तावत्पर्यंतं खात्वा तान्मूलान्येवोच्छेत्तुं ब्रूयात्॥तु मथेत्ये सेनितितवे प्रत्ययः॥पूर्वं कृत्स्न
पृथिवीलाभहेतुतया वेदिनाम निरुक्तं यज्ञात्मकस्य विष्णोर्लाभाधिकरणतयापि त
न्निर्वक्तियन्वेति॥अथ वेदेरुत्तरपरिग्राहः॥कर्त्तव्य इतीतिहासमुखेन विधिमुन्न
यति तमित्यादिना॥तं विष्णुमनुविद्या लब्ध्वा उत्तरपरिग्रहेण पर्यगृह्णन् गायत्रेण
त्वेत्यादिभिः प्राकृतः पूर्वपरिग्राहः॥तदपेक्षयास्योत्तरत्वं तस्य स्वरूपमाह सुक्ष्मासी
त्यादिना॥दक्षिणतो वेदेर्दक्षिणस्यां दिशि सुक्ष्मा चासीति यजुषा स्फ्यलेखया परिगृ
ह्णीयात्॥मंत्रतात्पर्यमाह इमामिति॥एवमुत्तरत्रापि योज्यं॥तृतीयमंत्रे उर्क्शब्दे
न बलकरो रसो विवक्षितः क्षितइति व्याचष्टे रसवतीमिति॥पयस्वतीत्यस्य व्याख्या
नमुपजीवनीयामिति पयस्विनी हि गौर्लोके उपजीव्यते॥पूर्वोत्तरपरिग्रहयोः सं
ख्यां समुच्चित्य प्रशंसति॥स वा इत्यादिना॥षडृतुसमुदायात्मकोयः संवत्सरस्त
दात्मकः प्रजापतिः संवत्सरकालभरणेन जातत्वादभेदोपचारः॥आम्नायते ह्येत
द्बृहदारण्यके तमेतावंतं कालमबिभर्यावान्संवत्सरस्तमेतावतः कालस्य परस्ता
दसृजतेति॥यज्ञश्चाश्रावयेत्यादि सप्तदशाक्षरसाध्यत्वात् एष वै सप्तदशः प्रजा ३९

पतिर्यज्ञमन्वायन्नितिश्रुतेः प्रजापत्यासकः एवंसयज्ञोमावान्परिमाणविशिष्टः अस्य
यज्ञस्यमात्रापरिमाणंचयावत्॥ तत्परिमाणविशिष्टमेवैतंयज्ञंषट्संख्यासंपादे
नपरिगृण्हातीत्सीकरोत्यर्थः॥ पूर्वोत्तरपरिग्रहयोर्मंत्रावयवसंख्यामनूद्यसमु
च्चिसप्रशंसति॥ षड्भिरिति॥ व्याहृतिपंतनइतिव्याहृतयोमंत्रावयवाः तेचपूर्वपरिग्र
हेषट्गायत्रेणत्वेत्यादिकास्तांतास्त्वयः गृण्हाम्यंतास्त्रयः॥ उत्तरपरिग्रहेचवसु
श्माचासीत्येवमस्यंताः षड्व्याहृतयः स्पष्टाः अन्यत्पूर्ववत्॥ गार्हपत्याहवनीययो
र्मध्येसावेदिरायामतोयजमानमात्री॥ साचपश्चाद्दिस्त्यश्चतुररत्निःपुरस्तात्
त्र्यरत्निः कार्येतिविधत्ते॥ व्याममात्रीति॥ व्यामःप्रसारितकरद्वयांतराललक्षणःप
श्चात्प्रत्यग्भागइत्यर्थः॥ त्र्यरत्निःप्राचीतित्रिभिररत्निभिर्विस्तृभिताप्राग्भागेवेदिः
कार्येत्यर्थः॥ त्रिवृद्धीति॥ सवनत्रयादिरूपेणयज्ञस्यत्रिवृत्त्वं॥ पक्षांतरमाह॥ नात्रे
ति॥ अत्रवेद्याःपरिमाणंनैवास्तियावतींयत्परिमाणविशिष्टामेववेदिंस्वयंमनसा
हविरासादनादिकार्यपर्याप्तांमन्येततत्परिमाणविशिष्टांवेदिंकुर्यात्॥ कात्याय
नोपीदंपक्षद्वयंअसूत्रयत्॥ व्याममात्रीपश्चात्त्र्यरत्निःप्राचीमपरिमितांवेति॥
वेद्यंसयोराहवनीयस्यस्पर्शंविधत्तेअभितइति॥ अग्निमभितः॥ आहवीयस्यद
क्षिणोत्तरपार्श्वयोर्वेद्यंऽउन्नयतिऊर्ध्वंप्रापयति॥ तदेतत्प्रशंसति॥ योषावाइति॥

लोके हि योषित्समांसमं साभ्यां परिष्वज्य शेते अतो वेदेरप्यंसाभ्यामग्नेः परिष्वंगो
युक्त इति भावः॥ योषा वा इति सिद्धवदुक्तं स्त्रीत्वं लौकिकस्त्रीसाम्येनोपपाद्य प्रशं
सति सा वा इति वरीयसी उरुतरा विस्तीर्णतरा उक्तं हि व्याममात्री पश्चात्स्यादिति म
ध्ये प्रसग्भागानंतरभाविनि मध्यदेशे संहारिता संकुचिता पुनः पूर्वभागे उदश विस्ती
र्णा त्र्यरत्निः प्राचीति विधानात् एवं वेदिस्वरूपमभिधाय तत्साम्यं स्त्रियां योजयति
एवमिति विमृष्टांतरांसेति॥ श्रोणितो विमृष्टं न्यूनमंतरं अवकाशो ययोः तौ विमृष्टां
तरौ तथाविधावंसौ यस्याः सा तथोक्ता संग्राह्येति मध्यदेशे हस्तेन संग्रहीतुं शक्या।
कृशोदरीतियावत् एवमेनां प्रशस्तयोषिदाकारां वेदिं कुर्वन्देवेभ्यः प्रियां करोति॥ अ
थ सा वेदिः प्राक्प्रवणोदक्प्रवणा वा कार्येति विधत्ते॥ सा वा इति॥ प्राक्प्राच्यां दिशि
प्रवणं निम्नं यस्याः सा तथोक्ता प्राच्या दिशो देवसंबंधित्वं दिग्विभजनसमये देवैरा
त्मीयतया स्वीकारात्॥ श्रूयते हि तैत्तिरीयके॥ देवमनुष्या दिशो व्यभजंत प्राचीं देवा
इति॥ इमां प्रसिद्धिं द्योतयितुं यत्र हि शब्दः॥ अथो इति पक्षांतरद्योतने॥ अत एव का
त्यायनोपि पक्षद्वयमसूत्रयत् प्राक्प्रवणामुदक्प्रवणां वेति॥ आपस्तंबस्तु प्रागुदक्त्वोपजी
वनेन विकल्पमसूत्रयत् प्राक्प्रवणामुदक्प्रवणां वेति॥ उदीच्या मनुष्यसंबंधः शांत
रूपत्वात्॥ अत एवान्यत्राम्नायते एषा वै देवमनुष्याणां शांता दिगिति॥ वेदेर्दक्षिण

भागस्य पांशुभिरोन्नत्यकरणं विधत्ते दक्षिणत इति पुरीषं खातं पांशुं प्रस्कन्दं तैर्हन्ति
प्रतिक्षिपतीति विहितमर्थमुपपादयितुं विपक्षे बाधमुपन्यस्यति ॥ एषा वा इति ॥ एषा
दक्षिणा दिक् पितृणां स्वभूता ॥ तथा च सा वेदिः यदि दक्षिणाप्रवणा स्यात् दक्षिण
तो निम्ना भवेत् तदा तत्रासिक्तोदकवत् यजमानोपि दक्षिणतो वर्तिष्णुं तं पितृलोकं
क्षिप्रं क्षिप्रमियात् प्राप्नुयात् प्राचीनप्रवणा यां तु वेद्यां नैष दोष इत्याह तथो हेति त
था सति स यजमानो ज्योक्चिरं जीवेत् ॥ खाता वेदिनाद्भिः श्लक्ष्णीकरणीया किंतु
पांसुलैव कार्येति विधत्ते ॥ पुरीषवतीमिति ॥ तत्प्रशंसति पशवो वा इति पशुप्राप्तिहे
तुत्वात् पुरीषस्य पशुत्वं पुरीषैः पांशुभिर्युक्तां वेदिं कुर्वन् पशुयुक्तामेवैनां कुरुत
इत्यर्थः ॥ पूराक्रूरस्येति मंत्रेण यद्वेदेः मार्जनं तद्विधत्ते तामिति ॥ एतत्प्रशंसार्थमिति
हासमाह ॥ देवा हेति ॥ पुरा खलु देवा असुरैः सह योत्स्यमाना एनमवोचन् ॥ किमिति ॥ अ
स्याः पृथिव्याः संबंधि अनाम्नतं तद्विपरीतमनाम्नतं सर्वदाबाधविधुरं ईदृग्विधं यद्देव
यजनं देवयागाधिकरणभूतं स्थानं तच्चंद्रमसि चंद्रमंडलमध्ये निक्षिपाम स इति व्यत्य
येनैकवचनं ॥ ते सुरा यदि नोस्मान् इतोस्मात् स्थानात् जयेयुः ॥ तदा वयमेतत्स्थानं प
रित्यज्य ततनएव चंद्रमसि निहिते तस्मिन् स्थान एव पुनर्यत्नं कुर्वाणास्तेन यज्ञेनासुरान्
पुनरभिभवेमेति ॥ ईदृग्विधोपायजनितहर्षघोनकोहं तरा इद्धः ॥ एवं विचार्य तथैव देवैः

स्तमितिदर्शयति॥सयदिति॥अस्ययेनपुल्लिंगतातद्यदस्याःपृथिव्याःसंबंधीत्यर्थः॥
न्यदधननिहितवंतोनिक्षिप्तवंतयन्निहितंदेवयजनंतदिदानींचंद्रमसिकृष्णवर्णेन
कलंकात्मनादृश्यते॥उक्तेर्थेलोकप्रसिद्धिमुदाहरति॥तस्मादिति॥यस्मादेवंपृथिव्या
अनाम्नतंदेवयजनंचंद्रमसिनिक्षिप्तंतस्मादेवकारणादस्याःपृथिव्याःसंबंध्युदीरते
देवयजनंचंद्रमसिविद्यतइतिभिज्ञाःकथयंतीत्यर्थः॥यदिदग्निधंदेवयजनंएतस्मि
न्नेवपुराक्रूरस्येतिमंत्रेणप्रतिमार्जनंकुर्वतोस्ययजमानस्यापियत्नेनेष्टंभवतीत्यर्थः॥
विहितंप्रतिमार्जनंमनूद्यमंत्रंविधत्ते॥सइति॥मंत्रगतक्रूरपदस्यार्थमाह॥संग्रामोवै
क्रूरमिति॥कथंसंग्रामस्यक्रूरशब्दाभिधेयतेत्याशंक्योपपादयति॥संग्रामेहीति॥क्रू
रकरणमपिकथंसंग्रामेविद्यतआहहतःपुरुषइति॥पुरुषस्याश्वादेश्चतुरंगबलस्यतत्र
हननलक्षणात्क्रूरकरणात्तदधिकरणभूतःसंग्रामोप्यत्रक्रूरशब्देनप्रतिपाद्यतइत्यर्थः॥
पदार्थमुक्त्वावाक्यार्थमाह॥पुराहीति॥क्रूरस्यसंग्रामस्य॥विसर्पोविसर्पणादागमना
त्पुरेतिमंत्रवाक्यार्थइत्यभिप्रायः॥मंत्रस्यद्वितीयंभागमनूद्यजीवदानुपदस्यविवक्षि
तमर्थंदर्शयन्व्याचष्टेउदादायेतिअस्याःपृथिव्याजीवंजीवनरूपंजीवात्मभूतंवायदना
म्नतंदेवयजनमासीदित्यर्थः॥तथाचजीवदानुंजीवनप्रदांजीवभूतांपृथिवीमितिमंत्रपदा
भिप्रायोवर्णितोभवति॥वैय्याकरणास्तुजीवेरदानुगितिजीवदानुपदंव्युत्पादयंति॥तथे ४१

वत्तैत्तिरीयकैराम्नातं॥ मंत्रस्य भागांतरमनूद्य व्याचष्टे॥ यामिति॥ ब्रह्मणा मंत्रेण एतच्च स्त
ध्याभिरित्यस्य व्याख्यानं॥ मंत्रस्यांतिमं भागमनूद्य व्याचष्टे॥ तामिति॥ एतेनेदानींतनेन देवय
जनेन तां चंद्रमसि स्थितामनाम्नतां पृथिवीमनुदिश्य तद्देवेदमिति॥ तदाश्येनानुसंधायेत्यर्थः॥
एतद्वै दर्नं प्रशस्तमिति अपिहेति॥ वेदिकरणानंतरं कर्तव्यं विधत्ते॥ अथेति॥ प्रोक्षणीरासादये
त्यादिकं संप्रैषं ब्रूयादित्यर्थः॥ प्रोक्षणीभिरिति प्रोक्षणार्थ आपस्तासामासादनं यत्तद्रक्षार्थमि
ति व्याचष्टे॥ वज्रो वा इति॥ स्फ्यस्तावद्वज्रस्तद्द्रव्यापरिणामत्वात्॥ तथैव प्रागाम्नातं॥ तस्य
स्फ्यस्तृतीयं वा यावद्वेति॥ ब्राह्मणोपि वज्रात्मकः तद्वन्मंत्रसामर्थ्येन रक्षसां हंतृत्वात्॥ तौ
खलु पुरेमं यज्ञमभ्यजूगुपतां अभितो रक्षितं गुपू रक्षणे अस्माल्लुङि गुपेश्छंदसीति चङि
रूपं तत्र ह्रस्वो यादयः आर्द्धधातुके वेत्यायप्रत्ययो विकल्प्यते॥ वज्रो वा इत्यादि॥ तस्माद्येनैताव
त्तिनिम्नं कुर्वंतीत्यपां वज्रत्वं प्रागेव श्रुत्या प्रतिपादितं॥ वज्ररूपाणां तासामासादनं यत्तस्या
भितो रक्षायै संपद्यत इत्यर्थः॥ प्रोक्षणीनामासादनसमये आग्नीध्रकर्तृकं स्फ्यस्योद्यमनं वि
धत्ते॥ सवा इति॥ उपर्यध्युपसः सामीप्ये इति॥ उपरिशब्दस्य द्विर्वचनं उपर्युपरि समीपे उ
परिदेशे आसाद्यमानासु प्रोक्षणीषु धार्यमाणासु सतीषु नंतरमासादनसमकालमेवाग्नी
ध्रः स्फ्यमुद्यच्छति धारयति॥ विपक्षे बाधमाह॥ अथ यदिति॥ उद्यमनमकृत्वा पूर्वं वेदि
मध्ये निहितस्य स्फ्यस्योपरि सादने स्फ्याब्राह्मणौ वज्रौ संगतौ भवेतां॥ तथा च वज्रद्व

यसंगमाद्यजमानस्यबाधःस्यादित्याम्नायः॥समोगम्यृच्छीसात्मनेपदं॥अस्यदोषस्याभा
वंस्वपक्षेदर्शयतितथोहेति॥तथोतथाच॥स्फ्यस्यवेदःसकाशादुद्यमनेसतीत्यर्थः॥त
स्मादितिप्रतिपादितार्थनिगमनं॥प्रतीकग्रहणेनविहितंसंप्रैषमंत्रंसाकल्येनानुवदति॥
42 अथैतामिति॥हेआग्नीध्रप्रोक्षणार्थाअपआसादयअग्निसमिंधनार्थमिध्मंदिस्त
रणार्थंबर्हिश्चआहवनीयसमीपेआसादयजुह्वाद्याःस्रुचःसंमार्जनसंस्कारेणसंस्कुरु॥
यजमानस्ययापत्नीतांयोक्त्रेणसंनह्य॥यत्राग्नावधिश्रितमाज्यंतेनोदेह्यागच्छेति
संप्रैषमंत्रःपरप्रसयनार्थंप्रयुक्तत्वात्संप्रैषमंत्रार्थःएवमेषमंत्रोप्यपरप्रसयनार्थंप्र
युक्तत्वात्संप्रैषएवनतुमंत्रांतरवद्दृष्टैकप्रयोजनइत्याह॥संप्रैषइतिसयदीत्यादि॥
प्रोक्षण्यासादनादिकमाग्नीध्रेणकारयितुंयदिकामयेततदाएतत्संप्रैषवाक्यंब्रूयात्॥
यदिचतथानकामयेतस्वयमेवकुर्यामितिसेवकामयेततदानसंप्रैषवचनंनाद्रि॥येना
पितद्विषयमादरमपिनकुर्यात्तत्रोपपत्तिमाहस्वयमिति॥अतोस्मात्कर्मणोनंतरमिदं
कर्मकर्तव्यमितिविहियस्मात्स्वयमेवैतद्वेदतस्मात्सरंप्रस्यज्ञानज्ञापनार्थः॥संप्रैषोनिरर्थ
कइत्यर्थः॥द्विषतोवधइतिमंत्रेणस्फ्यस्यबहिर्वेद्युद्दङ्निरसनंविधत्तेअथेति॥अभिच
रतोविशेषमाह॥अमुष्माइति॥अस्मिन्मंत्रेअमुष्माइतिशत्रोर्नामचतुर्थ्यानिर्दिश्येदित्य
र्थः॥हस्तप्रक्षालनंविधत्ते॥अथेति॥अवनेनिक्तेशोधयति॥प्रक्षालयेदित्यर्थः॥णिजि ४२

दृंहोच्चपोषणयोरितिधातुः निजांत्रयाणामित्यभ्यासस्यगुणः॥ अवनेजनस्यप्रयोजनमाह
पद्वीति॥ पत्खलस्यावेदेः खननादिकंक्रूरंकर्माभूत्तदनेनस्फ्यस्योदङ्‌निरसनेनास्यावे
देरहाष्टन्निरास्यत्। तस्मात्साण्याः क्रूरकर्मसंश्लेषादवनेजनेनशुद्धिः कार्येत्यर्थः॥ एता
नांहविषांयोगानुपाकूनिर्मितायावेदेश्चवर्हिःस्तरणात्पूर्वंस्पर्शनिषेधं विधित्सुस्तत्सि
ध्यर्थमितिहासमोचष्टेसयेहेति॥ पूर्ववद्बहुवचनस्थानेसद्व्येकवचनं॥ तेयप्रसिद्धाःय
जमानाः अग्रेपुराइजिरेइष्टवंतः तेखलुयागसमयेएतानिहवींषिकूसांवेदिंचावमर्शं
अवमृश्यायजंते तेनचतेनावमर्शजनितदोषेणपापीयांसः पापिष्ठाः निकृष्टाबभूवुः॥ याग
मकुर्वाणास्तुअवमर्शजनितदोषविरहात्श्रेष्ठाएवबभूवुः॥ ततोनंतरमेवअवमर्शनस्य
दोषहेतुत्वमजानानान्मनुष्यानश्रद्धायागविषयाअरुचिर्विवेदप्राप्नोत्॥ तामेवाश्रद्धांद
र्शयति॥ यइति॥ यागस्यानर्थहेतुनामस्तास्तिवुरित्यर्थः॥ ततइत्यादि ततोश्रद्धाप्राप्त्यनंत
रंकेनचिदपियागस्याननुष्ठानादितोस्मान्भूलोकात्देवान्प्रत्युपरोडाशादिकंहविर्नजगा
म॥ ननुमागमद्धविः अमृतोपजीविनांदेवानामनेनकिंप्रयोजनमित्यतआह॥ इतःप्र
दानाद्धीति॥ इतोस्माद्भूलोकात्प्रदीयमानंयद्धविस्तस्मादित्यर्थः॥ रुसल्वदोबहुलमितिप्र
पूर्वाद्दातेः कर्मणिल्युट्तत्वेतिहासमाहतेहेति॥ हविरागमनाभावेननिराहारास्ते
देवाअंगिरसःप्रत्यंचंहसंतिमुक्तवंतः किमितिअश्रद्धायागविषयामनुष्यान्प्राप्नो

44

त्तांनिरस्यतेभ्योपहतंविधेहियजध्वमितिविधिंकुर्यादित्यर्थः॥सचबृहनिरागत्योक्तवा
न्हेमनुष्याःकथाकथंकस्माद्धेतोर्नयजध्वेइतिथाहेतौचछंदसीतिथाप्रत्ययः॥एवं
पृष्टेस्तैरुक्तंयागाननुष्ठानप्रकारमुपन्यस्यति॥किंकाम्याकिंकामनयाकस्यफलस्येच्छ
येत्यर्थः॥एवंयागानुष्ठानत्यागकारणमुक्तवत्सुतेषुबृहस्पतिरयथानुष्ठानजनितमेव
तत्तस्यपापीयस्त्वंनतुसम्यग्यागानुष्ठानजमितिबोधयंस्तेषांविपर्ययभ्रमंतांनिरस्य
तियद्वैशुश्रुमेतियत्खलुवसुदेवानामर्थंपरिपूतंपरिगृहीतंशुश्रुमनदेनदात्मकएव
यतः तत्साध्यत्वात्सामान्योक्तंविशिनष्टियघृतानीतिशृतानिपक्वानिपुरोडाशादीनिह
वींषिपूर्वपरिग्रहादिभिःकृप्तानिर्मितावेदिरितियदस्तिएतत्साध्योहिदेवार्थोयतः तेनै
वेदृग्विधेनयज्ञेनहेमनुष्याःयूयमववमर्शमववमर्शस्ययागात्प्राक्पक्वानिहवींषिबर्हिः
स्तरणात्पूर्वंवेदिंचसंस्पृश्यअचारिष्टआचरणंकृतवंतःयागसाधनस्यचमनुष्यस्य
संस्पर्शोनयुक्तः अतस्तस्माद्देवावमर्शनात्हेमनुष्यायूयंपापीयांसोभूतनतुयागात्॥
अतोवमर्शंपरित्यज्यतेनयज्ञेनयजध्वं॥तथाचश्वःश्रेयांसोभविष्यतीतिबृहस्पतिनाबो
धितेअवमर्शनपरित्यागस्यावधिंपृच्छंति॥आकियत्तइति॥कियत्कालपर्यंतमवम
र्शनपरित्यागइत्यर्थः॥तस्योत्तरमाबर्हिषइति॥बर्हिःस्तरणपर्यंतंसंस्कृतांवेदिंनाव
मृशेदित्यर्थः॥एतत्त्वहविषामप्युपलक्षणं।अतःपक्वानिहवींष्यपियागात्पूर्वंनस्पृश्या ४४

नीतिद्रष्टव्यं॥ अत एव सूत्रितं कात्यायनेन॥ प्राक् स्तरणाद्वेदिं नावमृज्येत् भ्रष्टतान्निवह
वीष्यात्प्रचरणादिति॥ युक्तं चैतदित्याह बर्हिषेति॥ बर्हिःस्तरणात्पूर्वमच्छन्ना सती सावे
दिः स्तीर्यमाणेन बर्हिषा खलु छन्ना भवति अतो ऽछन्नायाः स्पर्शे प्रागुक्तो दोषो युज्यत इत्य
र्थः॥ सयदीत्यादि॥ बर्हिःस्तरणात्पूर्वं यदि वेदिमध्ये किंचित्तृणादिकमापद्येत तदा तन्नि
रासार्थमपि स्पृशेत्॥ किंतु बर्हिःस्तृणान् स्तरणसमये बर्हिःस्तरणं कुर्वन्नेव तत्तृणादि
कं निरस्येत्॥ स्तरणप्रभृति वेदिस्पर्शेन दोषाय इत्यभिप्रेत्याह अथेति॥ यदा यस्मिन्
काले बर्हिर्मुष्टिं स्तृणं सध्वर्युः स्तदानीं पदा पादेनाप्यभितिष्ठति॥ अतस्तस्मिन्समये स्प
र्शेन दुष्यतीति भावः॥ एवमुखीहासमुखेन प्रतिपादितमर्थं इदानीमप्यनुष्ठेयत्वेन विध
त्ते॥ सय इति॥ एवं विद्वान् उक्तमितिहासं जानन् नित्यर्थः॥ ॥इति पंचमं ब्राह्मणं॥ वेदार्थस्य
प्रकाशेन तमो हार्दं निवारयन्॥ पुमर्थांश्चतुरो वेदैर्याद्विद्यातीर्थमहेश्वरः॥ ॥ब्रह्माण्डं
गोसहस्रं कनकहयतुलापुरुषो स्वर्णगर्भं समाब्धीन्पंचसिरीत्रिदशानरुलताधेनुसौवर्ण
भूमीः॥ रत्नोस्त्रां रुक्मवाजिद्विपमहितरथो सायणिः सिंगणार्यो व्यश्राणीद्विश्वचक्रं प्रथि
तविधिमहाभूतयुक्तं घटं च॥ धान्याद्रिं धन्यजन्मा तिलभवमतुलस्वर्णजं स्वर्णमुख्यः का
र्पासं यं रूपावान्गुडकृतमजडो राजत राजपूज्यः आज्योत्थं प्राज्यबुद्धिर्लवणजमनृणः शा
र्करं चार्कतेजा रत्नाढ्यो रूप्यं गिरिमकृत मुदा पान्न सासिंगणार्यः॥ ॥इति महाराजाधि

राजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरहरिहरमहाराजसाम्राज्यधुरंधरेणसायणा
चार्येविरचितेमाधवीयेवेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणभाष्येप्रथमकांडेद्वितीयो
ध्यायः॥ ॥यस्यनिःश्वसितंवेदाःयोवेदेभ्योखिलंजगत्॥निर्ममेतमहंवंदेविद्याती
र्थमहेश्वरं॥ ॥प्रोक्षणीरासादयेतिप्रैषमंत्रानुसारेणप्रथमंप्रोक्षणीनामासादनमुक्तं॥
45 इध्माबर्हिषोरुपसादनमपिविशेषवक्तव्याभावात्सिद्धमभिप्रेत्यक्रमप्राप्तंस्रुक्संमार्जनवि
धत्ते॥सयाइति॥यथावाइत्यादि॥यत्खलुदेवानांवर्तनंतदनुसार्येवमनुष्यवर्तनंत
त्कार्यत्वान्मनुष्याणांचभोज्येन्नसूपशाकादौपक्वेसतिभोजनस्थानेचशोधितेतत्प
रिवेषणसाधनानिदर्व्यादीनिपात्राणिअद्भिःप्रक्षालनेनशोध्यंतेअतोमनुष्यव्यवहा
रनिदानत्वाद्देवव्यवहारस्यदेवानामन्नेहविषिपक्वेवेद्यांसंस्कृतायांतत्परिवेषणसाध
नानांस्रुचांसंमार्जनंयुक्तमितियत्स्रुचइत्येवमंतस्यवाक्यसंदर्भस्याभिप्रेतोर्थः॥निर्णे
निजतीत्यदभ्यस्तादितिझस्यादादेशः॥परिवेषतीत्यत्राप्येवं॥ननुमनुष्यपात्रवद्देव
पात्राणांस्रुचामप्यद्भिःप्रक्षालनेनभवितव्यंकिमनेनसंमार्जनेनेत्यतआहसयदिति॥
निर्णिक्ताभिःप्रक्षालिताभिःस्रुग्भिःप्रचराणीत्यनेनाभिप्रायेणसंमार्जनेनप्रक्षाल
नमेवककरोतीत्यर्थः॥देवपात्रस्यशोधनेमनुष्यपात्राद्विशेषमाहनद्वाइति॥द्वयेनै
केनेतिसामान्योक्तंविवृणोति॥अद्भिश्चब्रह्मणाचेति॥आपोहिकुशाइति॥अपांपवि ४९

यांश्वापरिधीणामरूपाहिकुशाः तथैवप्रागाम्नातं॥ताउपर्युपरिर्यतिपुनर्विरेत इमेदर्भा
स्ताहेताअनापूयिताआपइति॥अतःकुशैःसंमार्जनाद्यज्ञियाभिरेवप्रक्षालनंरू
तवान्नवतीसर्थः॥एवमेतदिति॥द्वयेनैकेनैवसाधनमेदरूतंदैवमानुषपात्रसं
स्कारणांनानात्वंभवतीसर्थः॥प्रथमंस्रुवस्यसंमार्जनंविधातुंतस्यादानप्रतपनेवि
धत्तेअथेति॥देवाहवाइत्यादिकंसमंत्रकप्रतपनस्यप्रयोजनप्रतिपादकंतच्चनिर्वा
पप्रकरणेप्रागेवव्याख्यातं॥अथतस्यप्रतप्तस्यस्रुवस्यसमंत्रकंसंमार्जनंविधत्ते॥
सवाइति॥स्रुवस्यांतरतोबिलमध्ये॥वेदाग्रैरितिसंमार्ष्टिसंमार्जनप्रकाराभिनया
र्थइतिशब्दः॥सचप्रकारःकासायपनेनसूचितः॥वेदाग्रैरंतरतःप्राक्संमार्ष्टीतिमंत्र
स्यपोजनमाहयथेति॥यथाखलुअयंस्रुवःअनुपरतःउपरतिमप्राप्तःसन्यजमा
नस्यभ्रातृव्यान्क्षिणुयाद्धिंस्यात्तूरिक्षिहिंसायामितिधातुः॥एवमेवैतन्मंत्रवाक्यमाहस
पत्नान्क्षिणोतीतिसपत्नक्षिदितिमंत्रपदस्याभिप्रायइतिभावः॥मंत्रशेषमनूद्यव्या
चष्टे॥वाजिनंत्वेति॥वाजोहविर्लक्षणमन्नंतदेवयज्ञः॥तदर्हत्वेनतद्दंत्वांवाजेध्या
यैवाजस्यान्नस्येंधनंदीपनंभूयःकरणमनेनक्रियतइतिवाजेध्यायज्ञः॥तस्येसं
माज्मीतिमंत्रशेषस्यार्थः॥तदेतदाह॥यज्ञियंत्वेति॥यज्ञमर्हतीतियज्ञियःयज्ञार्त्वि
ग्भ्यांइतिघः॥जुह्वादीनांस्रुचांसंमार्जनंविधत्ते॥एतेनैवेति॥अनिशितोसीतियो

यंस्रुवसंमार्जनमंत्रः॥एतेनैवानिशितासीतिस्त्रीलिंगत्वेनविपरिणमय्येनेत्यर्थः॥अ
तएवसूत्रकृतोक्तंअनिशितेतिस्रुचइति॥स्रुचःस्त्रीत्वेनतत्प्रकाशनायवाजिनंत्वेत्य
स्यापिपुंलिंगत्वाद्धस्तेनैववाजिनींत्वेतिस्त्रीलिंगत्वप्रोक्तव्यमित्याहवाजिनींत्वेति॥संमार्ज
नक्रियापेक्षयास्रुचमितिद्वितीया॥स्रुक्त्वादिवत्समंत्रकसंमार्जनस्यप्रसक्तस्यनिवृत्त्य
र्थमाहतूष्णीमिति॥प्राशित्रारव्योंगयोभागः॥सह्रियतेऽनेनेतिप्राशित्रहरणंगोक
र्णाकृतिपात्रंतंतूष्णींसंमार्ष्टीत्यर्थः॥तदुक्तंकात्यायनेनापि॥तूष्णींप्राशित्रहरणमि
ति॥आपस्तंबस्तुसमंत्रकपक्षमप्यसूत्रयत्प्राशित्रहरणंतूष्णींवेति॥स्रुचांसंमार्जन
प्रकारमभिनयेनदर्शयतिसवाइति॥इतिअनेनप्रकारेणप्रागपवर्गंवेद्यग्रेबिलमध्ये
संमार्जनंइत्यनेनप्रकारेणप्रत्यगपवर्गंआत्माभिमुखंबाह्यतःपृष्ठभागेवेदमूलेःसंमा
र्जनंकार्यमित्यर्थः॥तथैवसूत्रितंवेद्यग्रैरंतरतःप्राक्संमार्ष्टिनिष्ठितइतिविपर्यस्यब
हिर्मूलैरितियदेतदंतरतोबाह्यतश्चद्विविधंसंमार्जनंतत्प्राणोदानात्मनाप्रशंसतिइती
वेति॥इतिशब्दोद्वाप्यभिनयार्थः॥अयंप्राणवृत्त्यात्मकोवायुःइतीवअनेनप्रकारेणप्रा
ङ्संचरति॥उदानशब्दस्यापानरूपसमभिधायकत्वंप्राक्प्रतिपादितं॥अपानवृत्त्यात्मको
वायुःइतीवअनेनप्रकारेणप्रत्यङ्संचरति॥अतःप्राक्प्रत्यक्संमार्जनाभ्यांस्रुक्षुप्राणा
पानावेवस्थापयतीत्यर्थः॥तस्मादित्यादि॥यस्मात्स्रुचामुपरिभागस्यसंमार्जनंप्राचीनंप्र

ष्ठभागस्यचप्रतीचीनंतस्मादरत्नेरुपरिभागस्यलोमानिइतीवएवमेवप्राचीनानिभवंति॥ए
ष्ठभागस्यचलोमानिइतीवइत्थंप्रतीचीनानिभवंतीत्यर्थः॥अयमर्थस्तैत्तिरीयकेविस्पष्ट
माम्नायतेतस्मादरत्नौप्रांच्युपरिष्टाल्लोमानिप्रत्यंच्याधस्तादिति॥संमार्जनानंतरंप्रतप
नपुरःसरंप्रदानंविधत्ते॥सवाइति॥सखल्वाग्नीध्रःस्रुक्समार्गानंतरमेवसंमृष्टंपात्रं
पुनरग्नौप्रताप्याध्वर्यवेप्रदद्यादित्यर्थः॥तदेतत्पुनःप्रतपनंलौकिकदृष्टांतेनोपपादय
ति॥यथेति॥यथाखलुरकांस्यादिकंलौकिकपात्रमवमृज्यावमृज्यनिर्णिज्यप्रक्षाल्योत्त
मंचरमंक्रियाविशेषणमेतत्॥अंततःअनवमर्शंअवमर्शमकृत्वैवकेवलमुदकेनैवपरि
तःअंतरतोबाह्यतश्चसर्वतःक्षालयेत्एवंतत्संमार्जनानंतरंपुनःप्रतपनमित्यर्थः॥स्रुव
संमार्जनस्यप्राथम्यंस्रुक्संमार्जनस्यतदानंतर्यंचप्रागुक्तंलौकिकदृष्टांतेनप्रशंसितुमनु
वदति॥सवाइति॥योषावाइत्यादि॥स्रुक्स्त्रीलिंगत्वाद्योषितस्रुवस्तुपुंल्लिंगत्वात्सेचन
समर्थः॥पुमान्यस्मादेवंरूपःस्रुवस्यसंमार्जनेप्राथम्यंतस्मादेवकारणात्बह्व्योपिस्त्रि
यःसंभूयगसोबालमपिपुमांसंपुरस्कृत्यतस्यपश्चात्प्रयंति॥तस्माद्दृष्टानुसारेणस्रुवस्य
प्रथमंसंमार्जनमुक्तंपश्चात्स्रुचामित्येतद्युक्तमित्येतदर्थः॥संमार्जनेधर्मविशेषमाह॥स
वाइति॥यथायेनप्रकारेणसंमार्जनस्यसमयेअग्निमभिनव्युक्षेतअग्नेरुपरिसंमार्जन
साधनं।कुशोदकदिनपतेत्तथैवसंमृज्यात्तदेतल्लौकिकदृष्टांतेनोपपादयति॥यथेति॥

यस्य खलु भोजनार्थमन्नमाहरन्ति॥ तं प्रत्यर्थपात्रप्रक्षालनोदकेन यथाभ्युक्षेत्॥ एवमेव तदग्ने
रभ्युक्षणं॥ अग्नेर्होमार्थं हि हविः स्रुक्स्रुवादीनि च पात्राणि तत्साधनानि॥ अतस्तत्प्रक्षालनो
दकेन तस्याभ्युक्षणं तादृगेव स्यात्॥ न हि लोके पात्रप्रक्षालनोदकेन भोक्ताभ्युक्ष्यते अतः
पात्रसंमार्गोदकेनाग्नेरभ्युक्षणं न कार्यमित्यर्थः॥ कथं तर्हि संमार्जनं कार्यमित्याह प्राङिव
ति॥ प्राङ्मुख एवाग्नेः सकाशादुत्क्रम्यागत्वा अग्नेरुपरि यथा न पतन्ति तथा संमृज्जीतेत्यर्थः॥
स्रुक्संमार्जनानां वेदाग्राणामाहवनीये प्रहरणं तदनंतराभिमतमुपन्यस्यति॥ तद्वेकर
ति॥ स्रुचः संमृज्य तेन एभिरिति स्रुक्संमार्जनानि वेदाग्राणि अग्नावभ्यादधाति॥ तधना
मभिप्रायमाह॥ वेदस्येति यत्तत्साधनो हि वेदः वेदस्य संमार्जनाद्यावुपयुक्तत्वात्॥ एतानि
च तस्यावयवा अभूवन्॥ अहेत्यवधारणेन केवलं वेदावयवत्वात्॥ एवं वेदाग्राणां यास्तियत्वं
अपि तु वेदाग्रैः स्रुचः संमार्जिषुः समस्ष्वं तत्र ऋत्विजः अतः इदं वेदाग्रजातं यज्ञसंबंधि किं
चिदंगं यद्धि वेदग्नेरन्यत्र निरस्येत् तदा तत्तौ घेबहिर्द्वा वास्यतो भवेत्॥ अग्नौ प्रक्षिप्तं हि
यद्वेतं न भवति नैव त्यं न वेदिस नेनाभिप्रायेणाग्नौ प्रक्षिपंतीत्यर्थः॥ स्वमतं दर्शयितुमेकी
यं मतं निषेधति॥ तद्दु तथेति॥ एवं लौकिकदृष्टांतेनोपपादयति॥ यथेति॥ यथा खलु भोजना
योपविष्टं भोक्तारं ततः प्रागेव पात्रप्रक्षालनोदकं पाययेत् एवमेव तत् होमात् प्राक् संमार्जन
तृणानामग्नौ प्रहरणं अनेन तद्युक्तमित्यर्थः॥ स्वमतमुपन्यस्यति तस्मादिति यस्मादेकीय

मनेऽन्तकरीत्यादोषः तस्मादेतानि संमार्जनानि तृणानि उत्करे प्रक्षिपेदित्यर्थः॥ पक्षद्वयमपि का
त्यायनः सूत्रयामास॥ संमार्जनान्यपास्यत्याहवनीये प्रासनमेक इति॥ प्रैषक्रमप्राप्तं पत्नीसं
न्नहनं विधत्ते॥ अथेति॥ जघनार्द्धो वा इत्यादि॥ गार्हपत्ये त्वनुष्ठेयेषु पत्नीसंयाजादिषु पत्न्याः
संबंधात् सा यज्ञस्यापरार्द्धः किं तत इत्याह प्रागिति मदीयो यज्ञः प्रागपवर्गतायमानो विस्ती
र्यमाणो यान् गच्छेत्॥ अतः परार्द्धमारभ्य यत्तो विस्तारयितव्य इत्यनेनाभिप्रायेण पत्नीं सन्न
ह्येदित्यर्थः॥ यदेतत्संन्नहनं तदश्वेभ्यादीनामिव पत्न्याप्यनेन सार्द्धं योजनं बंधनमित्याह यु
नक्तीति॥ युक्तामइति योक्तुरभिप्रायाविष्करणं युक्ताच सा मदीयं यज्ञमनुलक्ष्य यज्ञसमाप्ति
पर्यंतं आसातै आसीत॥ न युक्तोऽश्वादी रथे नियमेनास्त इत्यर्थः॥ एवं विहितं सन्नहनं प्रशस्यत
स्साधनं विधत्ते योक्त्रेणेति॥ रथाद्यवयवस्य युगस्य धुरि बलिवर्द्दादियोजनार्थं दाम योक्त्रं तेन
सन्नह्येदित्यर्थः॥ लौकिकोदाहरणेनैतद्द्रढयति योक्त्रेणेति॥ योग्यं योजनीयं मनडुहश्वादिक
मित्यर्थः॥ तच्च संन्नहनं नाभिप्रदेशे कार्यमित्यभिप्रेत्याह अस्ति वा इति॥ अयज्ञियस्य पत्न्या नां
भेरधोभागस्य यज्ञियस्योपरिभागस्य च मध्ये संनहनेन सांकर्यनिवारणात् यज्ञियेनैवोपरि
भागेन विधास्यमानवेक्षणं साधुकृतं भविष्यतीत्यर्थः॥ परिहितस्य वाससउपरि तत्संन
नहनं कार्यमिति विधत्ते॥ सवा इति॥ योक्त्रपत्नीशरीरयोर्वाससा व्यवधानं प्रशंसति॥ ओष
धयइति॥ ओषधिकार्यत्वात् वाससः तत्तादात्म्यव्यपदेशः॥ वरुण्येति॥ वरुणसंबधिनी

वरुणपाशात्मिकारज्जुः सच वरुणपाशो निग्रहहेतुरिति तस्य व्यवधानेन केनचिद्वितत्यमि
तिवासो लक्षणोषधिभिरंतर्धानं युक्तमित्यर्थः ॥ तस्य प्रयोजनमाह ॥ तथोहेति ॥ विहितं संन
हनमनूद्य मंत्रं विधत्ते ॥ सइतिमंत्रं व्याचष्टे ॥ इयं वा इति ॥ अदितिरनवखंडनीया देवानां पत्नी
या पृथिवी सैव एषापि योषित् यजमानस्य पत्नी भवति तत्तस्मात्स्थित्या इवास्याः रास्नां रशनां
अलंकारार्थां मणिमुक्तादिखचितां मेखलामेवावध्नाति न रज्जुमिति मंत्रप्रयोगाभिप्रायः ॥ उक्ता
र्थपरतां रास्नाशब्दस्य दर्शयति हिरइति हिरशब्दो मेखलापर्यायः ॥ योक्त्रस्य संनहनसमये ग्रं
थिकरणं निषेधति ॥ स वा इति ॥ विपक्षे बाधमाह ॥ वरुण्य इति ॥ वरुणपाशो हि ग्रंथिमान् अ
तो ग्रंथिकरणाभावे योक्त्रं विस्रस्तं स्यादित्यत आह ॥ ऊर्द्ध्वमिति ॥ योक्त्रस्य मूलाग्रे संयोज्यैकी
कृत्योर्द्ध्वमुद्गृह्णेत् उपरिष्टाल्लंबयेदित्यर्थः ॥ तथा चोक्तं सूत्रकृता दक्षिणं पाशमुत्तरे प्रतिमुच्योर्द्ध्व
मुद्गूहतीति संनहनसमये गार्हपत्यस्य नैरृत्यां दिशि पत्न्या अन्वासनं विधित्सुः साक्षात्पश्चा
त्प्राङ्मुखोपवेशनं निषेधति ॥ सा वा इति ॥ तदुपपादयति ॥ इयं वा इति ॥ इयं हि पृथिवी देवानां प
त्नी सा गार्हपत्यस्य पश्चात्प्राङ्मुखी सर्वदा उपविशति ॥ अतस्तत्रासीना इमामेव देवपत्नीमभ्या
रोहेत् ॥ तथा च योषा बाधस्तं दर्शयति सेति क्षिप्रे अल्पकाल इत्यर्थः ॥ तथोहेति ॥ पश्चादुपवेश
नपरित्यागे सत्युक्तदोषाभावात् चिरकालं पत्नी जीवेत् तेन पश्चादासनपरित्यागेनास्मा देव
पत्न्या यदुपवेशनं विधत्ते ॥ तस्मादिति ॥ तस्मा देवपत्नीस्थानाद्दक्षिणतो दक्षिणभागे गार्हपत्यस्य ४८

स्यनैकसांद्रिश्चीत्यर्थः॥अतएवसूचितंकात्यायनेन॥पत्नींसंनह्यतिप्रसंगदक्षिणतउप
विष्टांगार्हपत्यस्यमुंजयोक्त्रेणेतिपत्न्याआज्यावेक्षणंविधत्ते॥अथेति॥रेतसःपुरुषोपभु
क्तान्नपरिणामत्वात्कारणकार्ययोरभेदोपचारात्तादात्म्यं॥विहितमवेक्षणमनूद्यमंत्रंवि
धत्तेसेति॥मंत्रगतमदब्धेनेतिपदंव्याचष्टेअनार्तेनेति।आर्तिर्हिंसातद्रहितेनेत्यर्थः॥अ
ग्नेर्जिह्वासीतिप्रतिपादितमाज्यस्यजिह्वारूपत्वमुपपादयति॥यदावाइति॥जिह्वास
दृशज्वालाहेतुत्वात्आज्यंजिह्वेत्युच्यतइत्यर्थः॥मंत्रगतंसुहूरितिपदंव्याचष्टे॥साध्विति॥
सुष्ठुहूयमानात्वात्सुहूःअनेनचहोमानुगुण्येनसाधुत्वंलक्ष्यतइत्यर्थः॥धाम्नेधाम्नइतिमं
त्रशेषंव्याचष्टेसर्वस्माइति॥धाम्नेधाम्नेतत्तद्देवताशरीरायपयजुषेयजुषेतद्ग्रहणमंत्रायचप
र्यासंभवेतिमंत्रार्थः॥अतःसर्वस्मैयत्तायैधिभवेतितदर्थप्रतिपादनंब्राह्मणेनक्रियतेपुरस्ता
द्धरणंविधत्तेऽथेति॥पत्न्यवेक्षणानंतर्यमथशब्दार्थः॥पुनस्तस्याहवनीयेधिश्रयणंविध
धत्तेतदिति॥हविःश्रपणंहिआहवनीयगार्हपत्ययोर्विकल्पितंतंत्राहवनीयेश्रपणपक्षेप
त्न्यवेक्षणानंतरमेवाज्यंपुरस्ताद्धृत्वाहवनीयेधिश्रयेदित्यर्थः॥एवंकुर्वतोभिप्रायमाह॥स
र्वइति॥यागसाधनत्वाद्धविरत्रयत्तशब्दार्थः॥आज्यपुरोडाशादिलक्षणंसर्वमपिमदीयंभ
हविःआहवनीयेसंस्कृतंभवेदित्यनेनाभिप्रायेणेत्यर्थः॥अस्मिन्नपिपक्षे॥प्रथमतोगार्हपत्या
धिश्रयणेकारणमाह अथयदमुत्रेति।अमुत्रगार्हपत्येऽग्नेपुरोडाशाधिश्रयणकालेपत्नीमव

कान्त्यायिष्यन्पत्न्यवेक्षणाद्धेतोः तत्संनिधानाय गार्हपत्येऽधिश्रयणं कर्तव्यमित्यर्थः॥ प्रथमत
एवाज्यस्याहवनीयेऽधिश्रयणे दोषमाह नहीति॥ पुरोडाशाधिश्रयणकाल एव आहवनीये यद्या
ज्यमधिश्रयेत् तदा गार्हपत्यसमीपे अन्वासीनायाः पत्न्यास्तदवेक्षणं न घटते भिन्नदेशत्वात्
49 यद्विच पत्नीमवकाशयिष्यामि अवेक्षयिष्यामीति तदर्थं सामिसंस्कारमध्ये तत्सस्रुक्पश्चात्
त्याः समीपं हरेत् तदा संस्कारविघातः स्यादिति तदपि न युज्यते अथैतद्दोषपरिजिहीर्षया प
त्नीनावेक्षयेत्॥ तस्याः पत्न्याः पश्चादन्तरायो भवति एतदुक्तं भवति॥ गार्हपत्ये हविःश्रपण
पक्षे हि आज्यमपि तत्रैवाधिश्रीयत इति तत्समीपोपविष्टायाः पत्न्यास्तदवेक्षणं घटत इति न
काप्यनुपपत्तिः आहवनीयश्रपणपक्षे प्रथमत एवाज्यस्यापि तत्रैवाधिश्रयणे ईदृग्विधो दो
षः प्रसज्जेतेति॥ कथं तर्हि तस्मिन्पक्षे कार्यमिति चेत् उच्यते॥ प्रथमतो गार्हपत्ये धिश्रित्य पत्न्य
वेक्षणानन्तरं आवनीयसमीपं नीत्वा तत्राधिश्रयेत्॥ तथा सत्युक्तदोषाभावमाह तथेति॥ त
स्मादित्यादि॥ यस्मादेवमाहवनीये प्रथमतोऽधिश्रयणे दोषस्तस्मात्तस्यास्सार्धं गार्हपत्ये प्रथमाज्य
स्य विलापनमित्यर्थः॥ यस्य तु पत्न्या रजोदर्शनादि निमित्तवशेना संनिधानात्तदीयकर्माण्याज्या
वेक्षणादीनि न क्रियन्ते तस्योक्तदोषाभावात्प्रथमत एवाहवनीये आज्याधिश्रयणं कार्यमित्याह
यस्येति॥ तस्याज्यस्यान्तर्वेद्यासादनं केषांचिन्मतेन निषेधति तदाहुरितिनिषेधाभिप्रायमाह
अत इति अतोऽस्मादेव खल्वाहुर्देवपत्नीनां यागः॥ अतस्तत्संबद्धस्याज्यस्यान्तर्वेद्यासादने सति ५०

तद्दैवदेवपत्नीरवसभाभ्रवगतजनसमूहाः करोति॥ यष्टव्यदेवसंघस्य वेद्यामवस्थानात्
अर्हे निनिषातो विनिग्रहेअस्तु नथालं देवपत्नीनां किं तद् इत्यनतआह॥ पर इति॥ देवपत्नीनां
सभाप्रापणादस्य यजमानस्य पत्न्यपि परःपुंसा भवति परइत्ययं सकारांतः परस्तादित्यर्थे स्व
प्ररूषादन्यत्र राजविध्यादौ पुरुषसमूहं प्राप्ता परःपुंसेत्युच्यते॥ अचतुरादिसूत्रे स्त्रीपुंसेति
निपातितत्वात् परःपुंसेत्युपपदांतरेपि समासांतो प्रत्ययोद्रष्टव्यः॥ इति श्राद्धएकीयमतस
मास्यर्थः॥ याज्ञवल्क्यमतेनां तवेद्यासादनमेव निगमयति॥ तदिति॥ यथादिदिष्टं यथा
देशनं यथाशास्त्रं पत्न्या संबधिकार्यं अस्तु भवतु अतःपत्नीसंयाजार्थं अंतर्वेद्या नासादनमि
तिनयुक्तं पत्न्यपि परःपुंसा वा भवतु प्रयातायथा तथा वा भवतु तयापि किं प्रयोजनं अतःपुरः
पुंसेसे तदपिदूषणं को वा आद्रियते सर्थः॥ एवमुक्तं दूषणं निरस्य वेद्यासादनपक्षमुपपादय
ति॥ यतो वेदिरिति॥ वेदिराज्यं चोभयमपि यज्ञसाधनत्वाद्यज्ञः॥ तथा च वेद्यासादने वेदि
रूपाद्यज्ञादाज्यरूपं यज्ञं निर्ममे निर्मितवान् भवतीत्यनेनाभिप्रायेण तत्रैवासादयेदित्यर्थः॥
तस्मादित्युक्तार्थनिगमनं॥ तस्याज्यस्योत्सवनं विधत्ते॥ प्रोक्षणीष्विति॥ प्रोक्षण्युत्सवनं या
भ्यां ऽपवित्राभ्यां कृतं तेन च नतआदाय ताभ्यामेवाज्यस्योत्सवनं कार्यमित्यर्थः॥ उत्सवनवि
धिस्तावकं ब्रह्मोहवाइत्यादि प्रागाम्नातं ब्राह्मणं आज्योत्सवनस्यापि समानमित्याह एके
वाहति॥ उत्सवनसंस्कारेण पर्यवसितमर्थमाह मेध्यमिति विहितमुत्सवनमनूद्य मंत्रं विध

50

ते॥सइति॥आज्यस्यैकत्वात्तत्सेकवचनांतत्तैवप्रोक्षण्युसवनमंत्रतोस्य विशेषः॥अन
स्तन्मंत्रव्याख्यानरूपंसविताबैदेवानांप्रसवितेत्यादिकंब्राह्मणमंत्रादिशति सोसावितिआ
ज्यस्योत्सवनानंतरंताभ्यामेवलेपसहिताभ्यांपवित्राभ्यांपुनःप्रोक्षण्युसवनंविधत्ते॥अ
थेति॥प्रागाम्नातमेवमंत्रंपठित्वातद्ब्राह्मणमप्यतिदिशति॥सवितुर्वइति॥आज्यलेप
सहिताभ्यांप्रोक्षण्युसवनमुत्पादयति॥तद्यदिति॥तत्तत्रयदिदमाज्यलिप्ताभ्यांपवित्रा
भ्यामपामुत्सवनंतेनपयएवास्सुदधातिस्थापयतिसंयोजयति आज्यस्यपयःकार्यत्वात्
अप्सुहिपरंपरयातत्कार्यत्वात्पयःप्रतिष्ठितंएतदेवपारंपर्येणोपपादयति॥इदंहीति॥
जग्धाभक्षइत्वा॥अदोजग्धिल्यप्तिकितीत्यदेर्जग्ध्यादेशः॥तस्मादिति॥यस्मादेवंगव्यंप
यःपरंपरयाउदकरसपरिणामरूपंतस्मात्कारणात्कार्यस्याज्यस्यापांचयदुत्सवनेसंसर्जनं
तद्रसस्यैवसर्वत्वायसंपूर्णत्वायकार्त्स्न्यायभवतीत्यर्थः॥अथध्वर्योराज्यावेक्षणंविधत्ते
अथेति॥एकीयंमतमुपन्यस्यनिरस्यतितद्धैकइति॥अवख्यापयंति॥ख्यातिरत्रपश्य
तिकर्मा॥अवेक्षयंतीत्यर्थः॥याज्ञवल्क्यमतमुपन्यस्यति॥तदिति॥यएवंयजमान
मवेक्षयंतितेस्वकीयेयज्ञेकथंकस्मादेवस्वयंयजमानाएवसंतोध्वर्यवोनभवंति॥कथंवा
स्वयमेवहोतारोभूत्वायाज्यानुवाक्यादिनानुब्रूयुः॥तेषामाध्वर्यवादिकरणेहेतुमाहयत्रेति
यत्रखल्वाध्वर्यवादौतत्करणमंत्रैर्बहुनराइवाशिषः॥फलप्रार्थनाःक्रियंतेतादृक्फलप्रतिपा ५०

दृकमंत्रविशिष्टमाध्वर्यवादिकंकस्मान्नकुर्युः॥तत्परिसज्यएषामेकेषांग्रासविनामंत्रैर्वावेक्षणं
यजमानेनैवकर्तव्यमितिकस्मात्कारणात्श्रद्धाजातेत्यर्थः॥एवंयजमानावेक्षणादिमहस्य अ
ध्वर्युणैवतदवेक्षणंकार्यमितिप्रतिपादयति॥यांवाइति॥दक्षिणाभिःपरिक्रीतत्वादृत्वि
ग्भिर्यत्सकलमाज्यास्यनेतद्यजमानस्यैवेतिनतेनपृथगाज्यासनंकार्यंअतोध्वर्युरेवाज्यम
वेक्षेतेत्यर्थः॥तदवेक्षणमनूद्यप्रशंसतिसइति॥अवेक्षणस्यकरणंहिचक्षुःतच्चयथा
भूतमेववस्तुविषयीकरोतीतिसत्यं॥एतदेवलोकव्यवहारेणसंवादयन्द्रढयति॥तस्मा
दितियस्मादेवंचक्षुःसत्यंतस्मादेवकारणात्विवदमानयोर्मध्येयश्चक्षुषादृष्टवानस्मी
तिवदतितद्वचनमेवश्रद्धार्हंनत्वितरस्यश्रुतवानस्मीतिवचनमित्यर्थः॥विहितमवेक्षण
मनूद्यमंत्रंविधत्ते॥सइति॥योयंतेजोसीतिमंत्रःसएवसत्योयथार्थःएवंकुतइत्यतआह॥ते
जोहीति॥हियस्मादेतदाज्यंतेजःतद्धेतुत्वात्तथाशुक्रंनिर्मलममृतंयागादिद्वाराअमरण
साधनंयद्वाअमृतवसुष्टिकरंएवमाज्यस्यैवंरूपत्वाद्विद्यमानार्थप्रकाशकत्वान्मंत्रःसत्यइत्य
र्थः॥ ॥इतिसायणाचार्यविरचितेमाधवीयेवेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणेतृती
याध्यायेप्रथमंब्राह्मणं॥ ॥अथजुहूपभृद्ध्रुवास्वेतस्याज्यस्यस्रुवेणग्रहणंविधित्सुस्तस्
समुदायस्यपुरुषावयवकल्पनयास्तुत्यर्थंतत्साध्ययज्ञस्यपुरुषतादात्म्यमाहपुरुषोवाइति॥
तादात्म्यमुपपादयति॥पुरुषस्तेनेति॥पुरुषप्रयत्ननिर्वर्त्यत्वाद्यज्ञस्यपुरुषत्वमित्यर्थः॥ए

यवाद्यसादि॥ यत एवं यत्तः पुरुषः अत एव यत्तो विस्तीर्यमाणो यदवयवपरिमाणवि
शिष्टः पुरुषः तादृगवयवपरिमाणविशिष्ट एव विधीयते तादृगवयवक्लृप्तिमभिनये
न दर्शयति॥ २ तस्येति॥ या जुहूः सेयं अयं दक्षिणो बाहुरित्यर्थः॥ तथा योपभृत् सेयं वा
म बाहुः ध्रुवा आत्मा मध्यदेह इत्यर्थः॥ अत एव तैत्तिरीयके विस्पष्टमाम्नायते जुहूर्दक्षि
णो हस्त उपभृत्सव्य आत्मा ध्रुवेति ध्रुवाया आत्मत्वमुपपादयति॥ तद्वा इति॥ आत्मनो
मध्यदेहाद्वा इमानि परितो वर्तमानानि हस्तपादादीन्यंगानि सर्वाणि प्रभवंति उत्पद्यंते॥
यस्मादेवं लोके॥ तस्माद्ध्रुवाया आत्मत्वात् तस्या एव सकाशात्कृत्स्नोपि यज्ञः प्रभवत्युत्प
द्यते॥ ध्रुवास्थस्याज्यस्य सर्वयागसाधारण्यमनेन प्रतिपादितं भवति॥ जुह्वादिषु सर्वासु
स्रुक्षु ध्रुवस्य संचरणमुपपादयितुं तस्य प्राणरूपतामाह प्राण एवेति। देहमध्ये वस्थितः प्राण
वायुर्यस्मात्सर्वाण्यंगानि नाडीभिः क्रमेण व्याप्नोति॥ तस्मात्तदात्मकः ध्रुवोपि जुह्वाद्याः
सर्वाः स्रुचोनुलक्ष्य क्रमेण संचरति एवं पुरुषावयवादिकल्पनया जुह्वादिसमुदायं प्रश
स्य लोकतादात्म्यप्रतिपादनेनापि तं प्रशंसति॥ तस्येति॥ तस्य यज्ञस्य असौ दूरदेशे वस्थि
ता द्यौरेव जुहूः इदमेवांतरिक्षमुपभृत्॥ इयमेव भूमिर्ध्रुवा जुह्वाद्यो लोकत्रयात्मिका इ
त्यर्थः॥ अस्त्वेवं॥ किं तत इत्याह॥ तद्वा इति॥ तत्तथा सति अस्या भूम्या एव सकाशात् यस्मादिमे
सर्वे लोकाः प्रभवंत्युत्पद्यंते॥ तस्मादेव कारणात्पृथिव्यात्मिकाया ध्रुवाया एव सर्वो यज्ञः प्र ५१

51

भवति॥इतोपिध्रुवास्थमाज्यंसर्वयागसाधारणमित्यर्थः॥अस्मिन्नपिपक्षेस्रुवस्यस
र्वासुस्रुक्षुसंचरणमुपपादयति॥अयमेवेति।योयंलोकत्रयेवायुःपवतेवातितदात्मक
एवस्रुवःसचबाह्योवायुर्यथासर्वान्लोकान्अनुलक्ष्यसंचरतितथैवतदात्मकस्य
स्रुवस्यापिलोकत्रयात्मिकासुस्रुक्षुसंचरणंयुक्तमित्यर्थः॥अथतासुस्रुक्षुआज्यग्र
हणंविधित्सुस्तस्यपुरोडाशादिहविरंतरवत्प्रसक्तंदेवतादेशनपूर्वकत्वंनिवारयितुमा
ह॥सएषइति॥तायमानोविस्तीर्यमाणोयज्ञःप्रथमम्अग्न्यादिभ्यःप्रधानभूतेभ्योदेवेभ्य
स्तादर्थ्येचतुर्थ्यादेवार्थंतायतेविस्तार्यतेतनुविस्तारइत्यस्मात्कर्मणियकितनोतेर्यकी
त्यात्वं॥ततऋतुभ्योवसंतादिभ्यःप्रयाजदेवताभ्यःछंदोभ्योगायत्र्यादिभ्योनूयाजदे
वताभ्यश्चतायतइतिशेषः।तत्रपुरोडाशादिलक्षणंयद्धविःस्तद्देवानांस्वभूतंअतस्त
द्देवतानामादेशपुरःसरंग्रहीतव्यंकुतएतदित्यतआहएवमितिएवमेवहितेषामग्न्या
दिदेवानांदर्शपूर्णमासादिषुसोमयागादिषुचनामादेशविशिष्टामंत्राःसमाम्नाताःअग्न
येजुष्टंगृह्णाम्यग्नीषोमाभ्यांजुष्टंगृह्णामीतिपुरोडाशनिर्वापेसोमरसग्रहणेष्वैंद्रवायवा
दिषूपयामगृहीतोसिवायवइंद्रवायुभ्यांत्वेति।अथेति।अथतस्मिन्यज्ञेयदाज्यग्रहणं
तत्प्रयाजानुयाजवद्देवतार्थंचशब्दादवशिष्टकृत्स्नपन्नार्थंचतत्तथासतितदाज्यंदेवता
नामनादिश्यानुक्त्वाआज्यसंबंधिनैवरूपेणगृह्णातिआज्यसंबंधिरूपंचदेवतायाअ

नादेशानं नवाएतत्कस्यैचनदेवतायैहविर्गृह्णन्नादिशातियदाज्यमित्यनादेशनस्यतद्ध
र्मतयाप्राग्गाम्नानत्वात्॥अथजुहूपभृतोराज्यग्रहणं विधत्ते॥सवाइति॥जुह्वांचतुर्वारं
स्रुवेणाज्यंगृह्णीयात्॥उपभृत्यष्टवारं तत्रजुहूस्थमाज्यंकिमर्थमित्याशंक्यतत्प्रयोजन
माह॥सयदिति॥केपुनस्तऋतवः येभ्योजुहूस्थमाज्यंभागइत्यतआह॥प्रयाजेभ्यइति
प्रयाजदेवताऋतवोवसंताद्याः तेषांचनामादेशनरहितमेवाज्यंग्रहीतव्यमित्युक्तंत
दिदानीमनूद्यतस्यप्रयोजनमाह॥तदिति॥तत्तथासतितदनादिश्यग्रहणंअजामितायै
जामितायैजामितादोषराहित्यायसंपद्यते॥हविर्ग्रहणाज्यग्रहणयोर्देवतादेशनेसत्यैक
रूपेणजामितास्यात्॥तमिमंदोषंविपक्षेदर्शयति॥जामिहेति॥औपभृताज्यस्यविनियोग
माह॥अथेति॥अत्रछंदसांकः प्रसंगइत्यतआहअनुयाजेभ्यइति॥गायत्र्यादिछंदोरूपाह्य
नुयाजदेवताः अतोनुयाजेभ्यएवोपभृतितदाज्यग्रहणं॥अत्रापिदेवतानादेशनंपूर्ववज्जा
मितादोषराहित्यायेत्याह॥तदिति॥पूर्ववद्विपक्षेबाधमुपन्यस्यानादेशनमुपपादयति॥जा
मिहेति॥ध्रुवायांचतुर्ग्रहणविधिपुरःसरंतत्प्रयोजनमाह॥अथेति॥ध्रौवाज्यग्रहणमप्या
ज्यधर्मेणदेवतानादेशनलक्षणेनकर्तव्यमित्युक्तात्रदेयतादेशनस्यप्रसक्तिरेवनास्तीत्याह॥
कस्मादुत्याद्दिशेदिति॥यतोयस्मात्कारणाद्ध्रुवास्थमाज्यंयज्ञेयावत्योदेवताः संतितावतीभ्यःस
र्वाभ्यएवदेवताभ्योअवद्यतिविभज्यगृह्णाति॥अतः सर्वदेवतासाधारण्याद्देवताविशे

षस्यादेशानंतसंभवतीत्यर्थः॥अतएवतैत्तिरीयकेसमाम्नायते॥यज्जुह्वांगृह्णातिप्रयाजेभ्यस्तद्
दुपभृतिप्रयाजानुयाजेभ्यस्तत्सर्वस्मैवाएतद्यज्ञायगृह्णतेयत्ध्रुवायामाज्यमिति॥अथजुहू
पभृतोराज्यग्रहणस्यचतुष्ट्वादिसंख्याविशेषमुपपादयितुमाह।ऐं यजमानएवेति॥यज
मानएवजुहूमनुभागीतस्यजुहूर्भागइत्यर्थः॥लक्षत्थंभूतारव्यानभागवीप्सास्विसनोःकर्मप्रव
चनीयत्वं॥कर्मप्रवचनीययुक्तइतिद्वितीया॥तथायश्चास्मैयजमानायातीयतिअरातिःशत्रु
रिवाचरतिसउपभृतमनुउपभृत्तस्यभागइत्यर्थः॥अतएवतैत्तिरीयकंयजमानदेवत्यावैजुहू
र्भ्रातृव्यदेवत्योपभृदिति॥तथाभोक्तुर्भोग्यस्यचक्रमेणजुहूपभृतोभागावित्याह॥अन्नैवजु
हूमिति॥तद्भागत्वेनतत्तादृशस्यमाह॥अन्नैवजुहूरिति॥प्राग्विहितंतयोराज्यग्रहणंस्तुसर्थ
मनुवदितुमनुसंधत्तेसवाइति॥तत्रजुह्वांचतुर्ग्रहणमनूद्यसंख्याल्पीयस्त्वंप्रशंसतिसयदिति॥
जुह्वाअतरूपत्वादष्टसंख्यातःचतुःसंख्यायाःअल्पीयस्त्वेतात्तारमेवपरिमिततरंअतएव
कनीयांसंअल्पीयांसंकरोति उपभृत्याज्यग्रहणसंख्यामनूद्यतद्भूयस्त्वंप्रशंसति॥अथयदि
ति॥आद्यरूपाद्युपभृत्॥तत्रभोक्तृरूपजुहूतःसंख्याबाहुल्याद्यद्भोज्यवस्तुजातमेवापरिमि
ततरमधिकतरमतएवभूयांसंबहुतरंअतिशयेनबहुलंकरोति॥तद्धिसमृद्धमित्यादि॥यत्
खलुभोक्तॄणामल्पीयस्त्वंभोग्यवस्तुजातस्यचभूयस्त्वंतत्खलुसमृद्धमित्यर्थः॥जुहूपभृतो
राज्यग्रहणेप्रतिनियतंधर्मविशेषंविधत्ते॥सवाइति॥भूयोबहुतरमधिकमाज्यंजुह्वांय

थाभवतितथासम्यक्पूर्णेनस्रुवेणकर्तव्यंकनीयोल्पतरंउपभृतिगृह्यमाणमाज्यंयथाभव
तितथाअर्द्धपूर्णस्रुवेणकार्यमित्यर्थः॥जोहवाज्यस्यविहितंभूयस्त्वमनूद्यप्रशंसतिसय
दिति॥ग्रहणसंख्याह्रासेनभोक्तारंभोज्यजाताद्बलीयांसंकुर्वन्भूयोग्रहणेनतस्मिन्भोक्त
रिअधिकंवीर्यंसामर्थ्यंतद्धेतुभूतंबलंचस्थापयति॥औपभृताज्यविहितमल्पीयस्त्वमनूद्य
प्रशंसतिअथयदिति संख्याधिक्येनभोग्यपदार्थमपरिमितंकुर्वन्अल्पीयसआज्यग्रहणे
नतमाद्यमवीर्यंवीर्यरहितंबलरहितंचकरोति॥तस्मादिति॥यस्मादेवमाद्यवर्गोबलरहितः
अन्नाचबलीयान्तस्मादेवकारणात्सार्वभौमोराजापारांनिरवधिकांविशंराज्यंप्रावसायप्रा
प्यापिएकवेश्मनैवएकगृहासनेवजिनातिजयतिस्वाधीनंकरोतितत्रचत्त्वतत्त्वतएकमेकंव
सुयथाकामयतेतथासचतेसमवैतिप्राप्नोतित्वश्चद्वएकश्चद्वसमानार्थः॥उतत्वःपश्यन्नदद्द
र्शवाचमित्यादौतथादृष्टत्वात्॥यद्वात्वदितिनिपातश्चार्थे॥जिनातिचयथाचकामयतइति
योज्यंतदेतद्ब्राह्मणःसामर्थ्यएतेनैनैववीर्येणजनितंयद्वीर्यंजुह्वांभूयोग्रहणेनभोक्तुर्निष्पन्नमि
त्यर्थः॥जुहूपभृतयोराज्ययोर्जुह्वैवहोमःकर्तव्यइतिविधत्ते॥सयदिति॥उपभृतोहोमसा
धनत्वाभावेतत्राज्यग्रहणंकिमर्थमित्याक्षिपतितदाहुरिति॥उपभृतिग्रहणंसमर्थयिष्यंस्ता
वत्तस्याहोमसाधनत्वेदोषमाह॥सयद्योपभृतेति॥होमसाधनत्वेजुहूवदुपभृतोपिस्वातंत्र्या
त्तत्स्थानीयाइमाःसर्वाःप्रजाःराज्ञःसकाशात्स्वतंत्राएवभवेयुःतथाचराजानैवान्नास्यात्

राज्यमपिनैवभोज्यंभवेदित्यर्थः॥उपभृतमाज्यंजुह्वामानीयतथैवहोमेतुनोक्तदोषइत्या
ह॥अथयदिति॥होमाभावेउपभृतिकस्माद्ग्रहणमित्यस्योत्तरमाह॥अथयदिति॥यस्माद्दे
वहोमायजुह्वमपेक्षमाणायांउपभृत्याज्यंगृह्यतेतस्मादेवकारणात्क्षत्रियस्यवैश्योरक्षार्थं
क्षत्रियाधीनवैश्यस्यैववैश्यंगवाद्याःपश्वादयउपतिष्ठन्ते॥उपभृतिग्रहणादेवास्यस्वकृनसमृद्धि
भवतीत्यर्थः॥अथयदित्यादि॥यस्मात्तदोपभृतमाज्यंसमानीयजुह्वांजुहोतिनोपभृता
तस्माद्यदैवक्षत्रियःकामयतेअथानंतरमेवतंवैश्यंब्रूते॥कथमिति॥हेवैश्यतेतवपरःप
रस्तादन्यत्रगोप्यस्थानेनिहितंयद्धनमस्तितदाहरेति॥एवमुक्त्वातंवैश्यंजिनातिधनापहा
रेणहीनंकरोतिअन्यस्पूर्ववत्॥एतेनेति॥उपभृदाज्यस्यजुह्वसमानयतजनितवीर्येणेत्य
र्थः॥ध्रौवाज्यस्यप्रागुक्तंसर्वयज्ञसाधारण्यंद्रढयितुंजुह्वादिष्वाज्यग्रहणंप्रकारांतरेण
प्रशंसति॥तानिवाइति॥सामान्योक्तंविवृणोति॥सयदिति॥प्राथम्यसाम्यासादश्चतुष्टयो
पेतत्वेनचतुःसंख्यासाम्याज्जुह्वांग्रहणंगायत्र्यर्थमित्यर्थः॥ननुत्रिपदागायत्रीकथ
मस्याश्चतुःसांख्यायोगःसत्यंअष्टाक्षरैःपादैस्त्रिपदाषडक्षरैःपादैश्चतुष्पदापिभवति॥
अतएवान्यत्राम्नायते॥सैषाचतुष्पदाषड्विधागायत्रीति॥त्रिष्टुब्जगत्योर्मिलितयोःपाद
नामष्टसंख्याभवति॥तथाचोपभृत्यष्टकृत्वोग्रहणंताभ्यामर्थेसंपद्यते॥एवमेवपादसं
ख्यासाम्यात्ध्रुवायांचतुर्ग्रहणमनुष्टुबर्थंभवतीत्यर्थः॥अनेनध्रुवायाअनुष्टुबर्थत्वो

पजीवनेन तस्याज्यस्य सर्वयज्ञसाधारण्यमभिप्रेत्याह वाग्वा इति अनुष्टुप् च वै सप्त
दशाश्च समभवतां सानुष्टुप् चतुरुत्तराणि छंदांस्यसृजत षडुत्तरान् स्तोमान् सप्तदशादीनि
सामब्राह्मणे सर्वेषां छंदसामनुष्टुप्सकाशात् सृष्टेराम्नातत्वात् सा वागात्मिका॥ वाचो वा
इत्यादि॥ वाचः शब्दस्य सकाशात्॥ इदं सर्वमर्थजातं प्रभवति॥ अत एव जगतः शब्दविव
र्तत्वमाहुः॥ अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरं॥ विवर्त्ततेर्थभावेन प्रक्रिया जगतो यत इति॥
तथान्यत्रापि शब्दानुवेधान्न कार्यत्वमर्थप्रपंचस्योक्तं॥ न सोस्ति प्रत्ययो लोके यः शब्दानुगमा
दृते॥ अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते॥ यस्मादेवं वाचः सर्वजगदुत्पत्तिहेतुत्वं तस्मात्
तत्संबंधिन्या ध्रुवायाः अपि सर्वयज्ञहेतुत्वं युक्तमित्यर्थः॥ इतोपि ध्रुवायाः सर्वयज्ञहेतुत्वमित्या
ह इयं वा इति॥ विहितमाज्यग्रहणमनूद्य मंत्रं विधत्ते स इति॥ मंत्रगतधामशब्दस्य विवक्षितम
र्थमाह॥ एतद्वा इति॥ धामशब्दस्तेजोवाची तद्धेतुत्वादाज्यमपि धामेत्युच्यत इत्यर्थः॥ मंत्रशे
षमनूद्य तत्रानाधृष्टपदस्य तात्पर्यगम्यमर्थमाह॥ अनाधृष्टमिति हि यस्मादाज्यं वज्रः घृतं
खलु वै देवा वज्रं कृत्वा सोममघ्नन्निति श्रुतेः वज्रश्च धर्षितुमशक्यत्वात् अनाधृष्टः अतस्तदा
त्मकत्वादाज्यमप्यनाधृष्टमित्यर्थः॥ अनेन मंत्रेण ग्रहणे विशेषमाह स एतेनेति॥ पक्षांतरमाह॥
तदाहुरिति॥ तत्र ग्रहणविषये ब्रह्मवादिन आहुः॥ अनेन मंत्रेण जुह्वादिषु त्रिस्त्रिर्गृह्णीयात्॥
तथा मंत्रग्रहणस्य प्रत्येकं त्रिरावृत्तत्वात् यज्ञस्य त्रिवृत्त्वं सिध्यतीति तेषामाशयः सकृत्पक्षं

निगमयपतिनदुन्विति॥ सर्वास्वपिस्रुक्षु सकृत्सकृद्देवमंत्रेण गृण्हीयात्॥ अत्र सकृद्ग्रहणपक्षेपिहिग्रहणस्यत्रित्वंसंख्यासमाहारेण संपद्यतइत्यर्थः॥ ॥इतिसायणाचार्यविरचितेमाधवीयेवेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणभाष्येतृतीयेध्यायेद्वितीयंब्राह्मणं॥ ॥अथेध्मादीनां प्रोक्षणंविधत्ते प्रोक्षणीरध्वर्युरादत्तइत्यादिना॥ अग्नयेकरोतीति॥ अग्नेरिध्मआधास्यतेअतोग्न्यर्थं प्रोक्षणे नेध्मंमेध्यंकृतवान्भवतीत्यर्थः॥ अथवेदिमिति॥ बर्हिषेकरोतीति बर्हिषेत्वेति मंत्रलिंगात्स्तरिष्यमाणबर्हिरर्थं वेदिंशुद्धांकरोति॥ प्रोक्षणेन बर्हिःस्तरणयोग्यतांवेदेरापादयतीत्यर्थः॥ अथेति॥ पुरस्ताद्ग्रंथीतिपुरस्तात्पूर्वभागे सन्नहरज्जोर्ग्रंथिर्यथाभवतितथासादयतीत्यर्थः॥ स्रुग्भ्यःकरोतिबर्हिर्दउप॥ रिस्रुचामासादमानत्वात्तद्योग्यतामेतन्मंत्रकरणकेन प्रोक्षणेनबर्हिषःसंपादयतीत्यर्थः॥ अवशिष्टानांप्रोक्षणीनां विनियोगमाहअथेति॥ ओषधीनामिति॥ स्तरणार्थमाहृतबर्हिर्लक्षणानामोषधीनामित्यर्थः॥ सूत्रितंहिकासायनेनशेषंमूलेषूपसिंचत्सदिसैर्युदनमिति॥ मंत्रस्यप्रयोजनमाहइयंवाइति॥ पृथिव्याःसंबंधिन्योयात्रीहियवाद्याओषधयःतास्तामेवमूलानिआर्द्रीकरोति॥ उंदीक्लेदनइतिधातुः॥ अनेनोदकेनताइमाओषधयःआर्द्रमूलाभवंति॥ यस्मादेवंतस्मादेवकारणात्ओषधीनामग्रभागेषुशुष्केष्वपिमूलभागाआर्द्रतयैवहन्यंतइत्यर्थः॥ प्रस्तरस्यग्रहणंविधत्तेअथेति॥ बर्हिःसंनह

55

नरजोर्ग्रंथिंविमुच्यपुरस्तात्॥पूर्वदिग्भागे विष्ठोरितिमंत्रेणप्रस्तरंगृह्णीयात्॥मंत्रस्यप्रयो
जनमाह॥यशोवाइति॥आहवनीयसाध्ययज्ञात्मकस्यविष्णोःसंनहनरजोर्विस्रंसनंविधा
यप्रशंसति।अथेति॥संनहनस्यविस्रंसनेसतिअस्ययजमानस्यस्त्रीप्रकृष्टंप्रकर्षेणक्लृप्तंद
शमासस्संपूर्णावयवमपसंविजायतेप्रसूतेइतिशाखाहेतौ॥यस्मादेवंतस्मादित्यर्थः॥+प्र
स्तरमुष्टिरेवशिरवारूपस्तुपःकेशसंघातः॥आहवनीयनिकटेतद्ग्रहणात्शिखामेवत
स्मिन्स्थापितवान्भवतीत्यर्थः॥पुरस्ताद्ग्रहणमनूद्यप्रशंसतिपुरस्तादितिअयंपिंडीभावे
नबद्धोमानुषःस्तुपःकेशसंघातःशिरसःपूर्वभागेहिभवति॥अतोयज्ञस्यापिपूर्वभागेस्तु
पधारणायपुरस्ताद्ग्रहणंयुज्यतइत्यर्थः॥+तस्याःसंनहनरजोर्देशविशेषेस्थापनंविधत्ते
तदिति॥नीविहैवेति॥अस्ययजमानस्यैषारज्जुर्नीविरेवभवतीत्यर्थः॥नीविरूपत्वंदृष्टांतेनो
पपादयतिदक्षिणतइवेति॥लोकेहिवाससःपरिधानेदक्षिणपार्श्वएवनीविःपरिकल्प्यते॥त
स्माद्दक्षिणश्रोणौसंनहनरज्जुनिधानंनीविपरिकल्पनमेवभवतीत्यर्थः॥संनहनस्योपरित
र्भैस्तरैश्छादनंविधत्ते॥तमुपरिष्टादिति॥तदुपपादयतिअभिछन्नेवेति॥उपरिवाससाछन्नेव
आवृतेवहिलौकिकीनीविर्भवतितस्मादाच्छादनंकार्यमित्यर्थः॥बर्हिषःस्तरणंविधत्तेअथे
ति॥स्तृणातिवेदिंछादयतीत्यर्थः॥तत्स्तरणंप्रशंसति॥अयंवाइति॥योयंप्रस्तरःसऊर्ध्व
बद्धकेशसंघातात्मकस्तुपःअतस्तद्व्यतिरिक्तानितद्भिन्नश्मश्रुप्रभृतीनियान्यवाङ्मुखानिलोमानि ५५

खा

स्तीर्यमाणेनबर्हिष्यास्ययजमानस्यतान्येवसंपद्यंतइत्यर्थः॥योषावाइत्यादि॥हविर्ग्र
हणायागस्ययेदेवाःवेदेःपरितउपविशंतियेचश्मश्रुधांसःप्रयोगाभिज्ञाःअनूचाना
अनुष्ठानपराःऋत्विग्रूपाःब्राह्मणाःसमीपेवर्तंते॥स्त्रीरूपावेदिःस्वयमनावृतासती
तेभ्योलज्जाविष्टाभवति॥अतस्याबर्हिषाछादनंअनग्नतायैसंपद्यतइत्यर्थः॥प्रका
रांतरेणस्तरणंप्रशंसति॥आवतीवाइति॥स्तरणस्यलक्षणंविधत्ते॥तद्वाइति॥बहु
लंनिरंतरंयथाभूमिनदृश्यतेतथास्तृणीयादित्यभिज्ञाःकथयंतीत्यर्थः॥एवंवदनाम
भिप्रायमाहयत्रवाइति॥अस्येषष्ठ्यर्थेचतुर्थी॥अस्याःपृथिव्याःसंबंधिनियत्रयस्मिन्
स्थानेओषधीनांबाहुल्यमस्तितदेवस्थानंसर्वैःप्राणिभिरितिशयेनोपजीवनीयंभव
ति॥तस्मादुपजीवनीयत्वसिद्धयेबहुलंस्तरणंकर्तव्यमित्यनेनाभिप्रायेणेत्यर्थः॥अस्तुभू
मेरुपजीवनीयतमत्वंतावतायजमानस्यकोलाभस्तत्राहतद्वाइति॥तस्यबर्हिषोयआ
हर्तायजमानस्तस्मिन्नेवतद्बहुलस्तरणकृतमुपजीवनीयतमत्वलक्षणंफलंभवति
अनुष्ठेयक्रियाफलस्यकर्तृगामित्वात्अतएवजैमिनिःसूत्रयामास॥शास्त्रफलंप्रयो
क्तरितल्लक्षणत्वादिति॥आहर्तर्येवाधीति॥अत्राधिशब्दोविभक्त्यर्थानुवादीस्तरण
स्यत्रिवृत्त्वंविधत्ते॥त्रिवृत्स्तृणातीति॥त्रिभिर्मुष्टिभिर्बर्हिस्त्रिधातुयथाभवति
तथावेदिंछादयेत्॥तत्रैकंमुष्टिंवेदेःपूर्वभागेस्तीर्त्वाद्वितीयंमुष्टिंतन्मध्यमभागेपूर्व

मुष्टिना संबद्धं स्तृणीयात्॥ ततस्तृतीयं मुष्टिमपि वेदेः परार्धे द्वितीयमुष्टिना संबद्धं स्तृ
णीयादित्येवं स्तरणस्य प्रसक्तपरिसमाप्तिरित्येकः पक्षः पक्षांतरमाह॥ अथो इति॥ प्रव
56 र्हं प्रअत्वह्य प्रथमं मुष्टिं वेद्यपरार्धे स्तीर्त्वा तस्याग्रमुद्यम्य तस्याधस्तात्संबद्धं द्वितीयं मुष्टिं
स्तृणीयादेवमेव तृतीयमपि॥ एवं मुष्टित्रयस्य परस्परसंबंधं कृत्वा त्रपास्योदाहरणेन द
र्शयति स्तृणंतीति॥ आनुषक् अनुषक्तं परस्परसंबद्धं बर्हिरध्वर्यवः स्तृणंतीत्यृक्यादस्या
र्थः॥ अतोस्मान्मंत्रलिंगात्पूर्वं मुष्टिं प्रत्रत्य तस्याधस्तात्संसक्तमेवापरं मुष्टिं स्तृणीया
दिति भावः॥ अस्मिन् पक्षे स्तरणस्य प्रागपवर्गता॥ कात्यायनः पक्षद्वयमपि सूत्रयामा
स॥ पश्चादपवर्गं प्रत्वहं वेति॥ अस्मिन्पक्षे बर्हिर्मूलस्याधरत्वं विधाय प्रत्वां सति अधर
मूलमिति॥ विहितं स्तरणमनूद्य मंत्रं विधत्ते संस्तृणातीति॥ ऊर्णम्रदसमिति मंत्रपदस्य
पर्यवसितमर्थमाह॥ साध्वीमिति॥ ऊर्णासूत्रनिर्मितं कंबलवन्मृदुभूतां त्वां हे वेदे स्तृ
णामीति हि तस्यार्थः॥ तथा च साध्वीं शोभनां देवेभ्यः प्रीतिकरीमित्ययमर्थः संपद्यते इत्य
र्थः॥ मंत्रस्य द्वितीयभागमनूद्य व्याचष्टे॥ स्वासस्थामिति॥ सुखेनासितुमुपवेष्टुं योग्यस्वा
सस्था॥ एतस्य पदस्याभिप्रायकथनं स्वासस्थामिति सुखेनासतुंआसदनमुपवेशनं कर्तुं
शक्या स्वासस्थां तामित्यर्थः॥ अग्नेः प्रबलीकरणं विधत्ते॥ अथाग्निमिति॥ कल्पयति॥
कृसंहविर्दहनसमर्थं करोतीत्यर्थः॥ तच्च कल्पनमाहवनीयस्यैवेति प्रतिपादयति शिरो ५६

वाइति॥देहस्यपूर्वदिग्भागेहिशिरःअतआहवनीयोपिवेदेःपूर्वस्थानात्शिरःतथाचयज्ञस्यपू
र्वार्द्धमाहवनीयंकल्पयन्शिरएवकल्पयतितस्मिन्समयेप्रस्तरस्योपरिधारणंविधत्ते॥उपर्युपरीति
अग्नेरसंसृष्टोपरिभागइत्यर्थः॥उपर्यधसःसामीप्यइतिद्विर्वचनंतत्कारणंप्रशंसति॥
अयंवाइति॥योयंस्तुपःकेशसंघातःशिरसिदृश्यतेअयमेवखलुप्रस्तरःयज्ञशिरसआहव
नीयस्योपरिप्रस्तरंधारयन्एतमेवकेशसंघातंतस्मिन्प्रतिदधातिपरिधिपरिधानंविध
त्तेअयेतिपरितोधीयंतइतिपरिधयः॥उपसर्गेघोःकिरितिकर्मणिकिप्रत्ययःतदेतत्
परिधानमुपपादयितुमनुवदति॥तद्यदिति॥इतिहासमुखेनैतत्परिधानमुपपादयति॥
यत्रवाइति॥यत्रखल्विमंहव्यवाहमग्निंपुराहोतृकर्मणेदेवाःप्रावृणतप्रवृतवंतःतत्तदानींसो
ग्निःवाचोक्तवान्कथमितितदुच्यते।नखल्वहमिदानीमुत्साहंकरोमिवोयुष्माकंहोतास्यांहव्यंच
वहेयमितियदेतद्धोतृत्वंहव्यवहनादिलक्षणंकार्यंयुष्माभिःप्रार्थ्यतेतत्कर्तुंनोत्सहइत्यर्थः॥अ
नुत्साहकारणमुपन्यस्यति॥त्रीन्पूर्वानितिहेदेवाःयूयंमदीयान्पूर्वपुरुषांस्त्रीन्प्रावृढंप्रवृतवंतः
तेचतत्रएवप्रवरणात्प्राधन्विषुःप्रागमन्अम्रियतेत्यर्थः॥एतच्चप्रागाम्नातंचतुर्धाविहितो
हवाअग्नेनिरासेसत्रतानित्यादि।प्रागतांस्तान्मदीयान्पूर्वंअकल्पयतप्रावृक्तांस्तान्मूर्त्तिसा
मर्थ्ययुक्तान्कुरुत।अथानंतरमेवहोतास्यामित्यादियतएतदुत्साहश्चअहमेवतद्विष्यमुत्सा
हंकरिष्यतेचदेवास्तथेसंगीकृत्यएतानकल्पयन्समर्थान्मूर्त्यादियुक्तानकुर्वन्॥तेचेमेपरि

धयः संजाताः एतमाख्यायिकया परिधीनामुत्पत्तिं प्रतिपादितैं घृतैरग्नेः परिधानं कार्यमित्येत
दपि प्रतिपादयति सहेति ॥ एतद्देवान्प्रत्यग्निवाक्यं ॥ प्रारणक्ष्म कर्षेणा वर्जयत् ॥ वषट्काराद्भी
तं मां पत्येन परिधानेन हेतुना वषट्कारात्मको वज्रो न हिंस्यात्तदेतत्परिधानं मम कुरुत ॥ तथा
च वषट्कारात्मको वज्रो मां न प्रवक्ष्यति न हिंसिष्यति एवमग्निनोक्ते देवा अपि तथेत्यंगीकृत्य तं
परिधिभिः पर्यदधुः ॥ अतो देवैः परिधानकरणात्तमग्निं वज्रात्मको वषट्कारो नाबाधिष्ट अतः
57 परिधानं अग्नेः कवचबंधनमेव भवति ॥ तस्मादवश्यं तत्कर्तव्यमिति भावः ॥ अथ प्रसंगाद्भूपत
ये स्वाहेत्यादिमंत्रैः स्कन्नस्य हविषोऽभिमर्शनं विधित्सुः परिधिरूपेणावस्थितानां भूपत्यादिसंज्ञ
कानां तेषामग्नीनां स्कन्नद्रव्यभाक्त्वं प्रतिपादयति ॥ तद्वहेत्यादिना ते परिधिरूपेणावस्थिताः पू
र्वाग्नयः एतद्वक्ष्यमाणमूचुरुक्तवंतः ॥ अस्मांश्चेदिदमिदानीं यज्ञे पुनर्युंक्थ युक्तान्कुरुथ ॥ तर्ह्य
स्माकमपि यज्ञे कश्चिद्भागोऽस्त्विति ॥ देवाश्च तथेति प्रत्यशृण्वन् ॥ प्रतिश्रुत्य चैवमब्रुवन् ॥ क
थमिति ॥ बहिः परिधि परिधीनां बाह्यदेशे यद्धविः स्कन्त्स्यति स्कन्नं भविष्यति तद्युष्मासु हुत
मस्तु तत्स्कन्नं हविरसाधारणो युष्मद्भागो भवत्वित्यर्थः ॥ अथ च वो युष्माकमुपर्युपरि अस्तं तत्स
मीपोपरिभागे यद्धविर्होष्यंति तद्धो युष्मान् विष्यति तत्सान्करिष्यतीति अवतिरत्र तत्सार्थः ॥ अवर
क्षणगतिकांतिप्रीतितृप्त्यवगमेच्छितिपठितत्वात् ॥ यच्चाग्नौ होष्यंति तदपि युष्माकं तृप्तिकरमस्त्वि
ति ॥ एवं देवैस्तेषामग्नीनां भागोऽदत्तः यस्मादेवं तस्मादिदानीमग्नौ हवनादिकं एनांस्तर्पयतीत्याह ५७
प

स्तयदिति॥सइतिव्यत्ययेनबहुवर्थेएकवचनं॥तथाचबर्हिष्परिधिषुहविःस्कंदतितदेतेष्वग्नि
षुहुतमेवभवति॥स्कन्नस्यचतन्नागतत्वंप्रत्यक्षतोदर्शयति॥तस्मादुहेति॥यस्मादेवंपरिधि
रूपाग्नीनांस्कन्नंहविर्भागत्वेनपरिकल्पितंतस्मादेवकारणात्हविःस्कन्नंस्यादितियत्तद्याग:
अपराधोनभवति॥कुतइत्यतआहइमामिति॥तेप्रगताअग्नयइमांभूमिंखलुप्रविष्टाः॥पश्चा
न्यादिकं किमपिहविःस्कंदतितत्सर्वंपृथिव्यामेवप्रतितिष्ठतिएवंचतेनस्कन्नेनतत्रस्थानामग्नी
नांसंबंधात्तेसिर्नविष्यतीतिनस्कन्नदोषःएवंभूगतंस्कन्नंहविःपरिरूपेणावस्थितानांभूमौ
प्रविष्टानामग्नीनांभागइत्युपपाद्यतदग्निनामधेययुक्तैर्मंत्रैस्तस्याभिमर्शनंविधत्ते॥तस्क
न्नमिति॥तत्तत्रैवंनामोद्देशेनाभिमर्शनेकृतेसतियथावषट्कृतंवषट्कारेणप्रत्तंहविःतस्यै
देवतायैहुतंभवतिएवमेवास्ययजमानस्यएतेषुभूपत्यादिनामकेषुपरिधिरूपाग्निषुतत्स्कन्नं
हविर्हुतमेवभवतीत्यर्थः॥तेषांपरिधीनामिध्मावयवत्वंकश्चिन्मन्यंतेतेषांमतमुपन्यस्यति॥त
द्वैकइत्यादि॥इध्मस्येत्यवयवावयविसंबंधार्थाषष्ठीइध्मस्यावयवभूतानीत्यर्थः॥अग्निसमिं
धनायहीध्मःक्रियते॥अतस्तदवयवानांसमिंधनसामर्थ्यमेवनतुपरिधानसामर्थ्यमस्तीत्यन
वक्लृप्तिःतदेतद्वाहअनवक्लृप्ताइतितस्योहेत्यादि॥यस्ययजमानस्यपरिधयइत्थंरूपेणेध्मास्त्र
थकएतानेवाहरंत्यध्वर्यवःतस्यैवयजमानस्यएतेवक्लृप्ताःपरिधानलक्षणकार्यक्षमाभवं
तीत्यर्थः॥यस्मादेवंतस्मात्इध्मानन्तर्भूतानरक्षान्उत्तरोत्तरानुकल्पनयोपादेयान्विधत्ते॥

58

तेवाइति॥तेखलुपरिधयःपलाशावृक्षजाभवेयुः॥ब्रह्मवाइत्यादिनतत्प्रशंसाब्रह्मविषयस्यरह
स्यस्यश्रवणात्पलाशवृक्षस्तावद्ब्रह्मात्मकः॥तथाचतैत्तिरीयकं॥देवावैब्रह्मन्नवदंतत्पर्णउ
पाश्रृणोदिति॥अग्निवाय्वादिस्वरूपेणहिरण्यगर्भाख्यब्रह्मणएवावस्थानादग्निरपिब्रह्मा
त्मकः॥तादृगग्न्यात्मकत्वंचपरिधीनांप्रतिपादितं॥अतोग्निरूपब्रह्मात्मकानांपरिधीनांपला
शरूपब्रह्मविकारत्वंयुक्तमित्यर्थः॥स्पष्टमन्यत्॥ ॥इतिसायणाचार्यविरचितेमाधवीये
वेदार्थप्रकाशेमाध्यंदिनशतपथब्राह्मणेतृतीयाध्यायेतृतीयंब्राह्मणं॥ ॥समाप्तश्चद्वि
तीयःप्रपाठकः॥ ॥अथपरिधीनामार्द्रतांविधायप्रशंसति॥तेवाइति॥एतदार्द्रत्वंखल्वे
षांजीवतांजीवनलिंगंस्थावरजंगमादिशरीरेयत्रखल्वार्द्रत्वमस्तितेनतेसतेजसःअवय
वकांतिलक्षणेनतेजसायुक्तावीर्यवंतोबलवंतश्चभवंतिअतःसतेजस्त्वादिसिद्ध्येपरिधयो
प्यार्द्रभवेयुरित्यर्थः॥आर्द्रस्यचसजीवत्वंशुष्कस्यचनिर्जीवत्वंछंदोगैराम्नायते॥अस्य
सोम्यमहतोवृक्षस्ययोमूलेभ्याहन्याज्जीवन्स्रवेत्अस्ययदेकांशाखांजीवोजहात्यथसाशु
ष्यतीतिआहवनीयस्यपश्चिमभागेमध्यमपरिधिरेवप्रथमंपरिधातव्यइतिविधत्तेसइ
ति॥मंत्रःस्पष्टार्थइत्यभिप्रेत्यब्राह्मणेनतव्याख्यायते॥अस्मिन्मंत्रेदक्षिणोत्तरपरिधिमं
त्रयोश्चयदग्निर्हिउईडितइतियदग्निनातादात्म्यप्रतिपादनंतावन्मात्रंव्याख्यास्यतेअस्माभि
स्तुसंहितायामेवमंत्राव्याख्याताइतिनपुनस्तत्रेव्याख्यातव्याःदक्षिणोत्तरपरिध्योरपिसमंत्र ५८

कंपरिधानंविधत्ते॥अथदक्षिणमित्यादिना॥अग्नयोहीत्यादियस्मात्सागुत्तरीत्यापरिध
योग्नयः तस्मात्कारणादग्निरीडइडितइत्यग्निरक्षेनपरिधिरभिधीयतइत्यर्थः॥पूर्वाधा
रसमिधोभ्याधानंविधत्ते॥अथेति॥अथवायव्यांदिशमारभ्याग्नेयदिग्भागपर्यंतमविछिं
न्नधारयाहोमः पूर्वाधारः सचयत्रपरिसमाप्यतेतत्रैकांसमिधमादध्यादित्यर्थः तत्रधर्मवि
शेषमाहसमध्यममवेतिअभ्याधानात्पूर्वंमध्यमंपरिधिंतयासमिधासंस्पृशेदित्यर्थः॥तस्य
प्रयोजनमाह॥तेनैनानिति॥तेनोपस्पर्शनेनपरिधिरूपानेनानग्नीन्अथमंसमिंधेअग्नाव
भ्याधानेनाहवनीयरूपेणप्रसक्तस्याग्नेः समिंधनमित्यर्थः॥विहितमभ्याधानमनूद्यमंत्रं
विधत्ते॥सइति॥अस्याभ्याधानसाधनमंत्रस्यगायत्रीछंदस्कत्वात्छंदसांमध्येगायत्र्यारव्य
मपिछंदः प्रथमंसमिंधेसंदीपयति॥समिद्धाचसागायत्रीउष्णिगादीन्यन्यानिचतुरुत्तराणि
छंदांसिसंदीपयतिसमिद्धायाश्चतुर्विंशत्यक्षरायागायत्र्यास्तत्रसर्वत्रानुगमात् गायत्र्या
समिद्धानितानिछंदांसिदेवेभ्योयज्ञंवहंतिप्रापयंतिअथोत्तराघारसमिधोभ्याधानंविध
त्ते॥अथयामिति॥द्वितीयाघारोनिर्ऋतीदिशमारभ्येशानीदिशंप्रत्यविछिन्नधारयाहो
मः॥सयत्रपरिसमाप्यतेतत्रैकांसमिधमादध्यात्पूर्वाघारसमिदपेक्षयाद्वितीयामितिव्य
पदेशः। तयाचसमिधावसंतऋतुः संदीप्यते॥निगदसिद्धमेतत्॥अभ्या॰धानमनूद्यमंत्रं
विधत्ते॥सइति॥समिद्धीतिअस्याः समिधोवसंतदीपकत्वमुक्तंवसंतश्चप्रजानांमध्ये

प्रथमप्रयाजः सचसमित्संज्ञकः समिधोयजतीतिनिर्दिधानात् इदंइरिद्रसिद्धिरन्यत्राहिम्ना
ह्वेनप्रतिपाद्यते॥ एवमाघारसमिधोभ्याधानानंतरंमंत्रविशेषस्यजपंविधत्ते॥ अथेति॥
मंत्रस्यप्रयोजनमाह॥ गुप्त्येवाइति॥ राक्षसादिसंचरणनिवारणंगोपनं गुप्त्यर्थंहिपरिधा
नंपूर्वस्यांदिशिपरिधिर्नास्ति॥ तथाचएतत्एतेनसूर्यस्त्वेतिमंत्रोच्चारणेनतत्रोद्यंतंसूर्य
मेवयत्तस्यरक्षितारंकरोतिशिष्टंगतं॥ इममर्थंतैत्तिरीयकाविस्पष्टमामनंतिपरिधीन्परिद
धातिरक्षसामपहत्यैसंस्पर्शयतिरक्षसामनन्ववचारायनपुरस्तात्परिदधात्यादित्योह्येवोद्यन्पुर
स्ताद्रक्षांस्यपहंतीति॥ अनुयाजप्राक्कालेभ्याधानायैकासमिद्वशेषयितव्येत्यभिप्रेत्यतस्याः
समिविधास्यमानमभ्याधानमनूद्यप्रसंगात्तस्यप्रयोजनमाह॥ अथयामितिअमूमिति॥ अ
दःशब्दोविप्रकृष्टार्थवाची॥ विप्रकृष्टेनूयाजप्राक्कालेभ्याधेयामित्यर्थः॥ ब्राह्मणमेवतयेति॥
तेनाभ्याहितयासमिधायजमानरूपंब्राह्मणमेवसमिंधेसंदीपयति॥ गतमन्यत्॥ एवमा
हवनीयेकर्तव्याः परिधिपरिधानादयोविहिताः॥ अथवेद्यांहविरासादनार्थंप्रस्तरणंवि
धित्सुस्तदर्थंविधृत्योःसादनंविधत्ते॥ अथेति॥ बर्हिषास्तीर्णांवेदिमुपलक्ष्यआहवनीयस
मीपादुपावर्ततेत्यर्थः॥ उपाहृत्सचबर्हिषःसकाशाद्द्वेतृणेआदायबर्हिषउपरितिरश्चीतिर्य
गन्येनिदधातिसवितुरितिमंत्रेणतदेतत्तृणनिधानंप्रशंसतिअयंवाइति॥ प्रस्तरोहिय
तस्यस्तुपःकेशसंघातः॥ बहवःशिष्मश्मश्रुप्रभृतीनिलोमानितथाचप्रस्तरबर्हिषोर्मध्येति

र्यङ्निहिते एते तत्त्वेण भ्रुवावेव भ्रूस्थानीये इत्यर्थः॥ लोकप्रसिध्यात इयति॥ तस्मादिति॥ य
स्मादेवं यस्ते केशश्मश्रुरूपेण संस्तुतयोः प्रस्तरबर्हिषोर्मध्ये मध्ये संस्थिते तत्त्वेणे तिर्यङ्निधा
येते तस्मात्कारणात्सुरूपशरीरस्य भ्रुवौ तिरश्च्यौ दृश्येते इत्यर्थः॥ तिर्यङ्निधानस्य प्रयोज
नमाह क्षत्रं वा इति॥ क्षत्रियवैश्ययोर्जातीये प्रस्तरबर्हिषी अतस्तयोर्विविधं धारणाय त
तिर्यक्तृणनिधानं संपद्यते॥ इतरथा हि प्रस्तरबर्हिषोः सांकर्यात्॥ क्षत्रियवैश्ययोरपि सांक
र्यं स्यात् यस्मादेवमेते तत्त्वेणे तिर्यङ्निहिते विधारणप्रयोजनेन तस्मादनयोर्विधृती इति ना
म संपद्यत इति निर्ब्रूते तस्मादिति प्रस्तरस्य समंत्रकं स्तरणं विधत्ते॥ तदिति तत्त्वविधृ
त्योरुपरीत्यर्थः॥ प्रस्तरणमंत्र स्तृबर्हिस्तरणमंत्रवत्तत्र स्तीर्यमाणाया वेदेरभिधेयत्वा
त्साध्वीं देवेभ्य इत्येवं स्त्रीलिंगतया व्याख्यातः॥ अत्र तु प्रस्तर एवाभिधेय इति साधुं देवेभ्य
इति पुलिंगतया व्याख्यापनं इत्येतावानेव विशेषः अन्यत्सर्वं व योज्यं॥ स्तीर्णस्य प्रस्त
रस्योपरि पस्पर्शनं विधत्ते॥ तामभीति॥ आत्वेति मंत्रेण प्रस्तरस्योपरि हस्तं निध्यादित्य
र्थः॥ मंत्रव्याख्यानं सुगमं॥ जुह्वादीनां सादनपर्यंतं प्रस्तरस्यान्वारंभं विधत्ते॥ अभिनिहित
एवेति॥ सव्यहस्तेन प्रस्तरोभिनिहितः संस्पृष्ट एव न वेत्॥ अथानंतरमेव दक्षिणेन हस्ते
न जुहूं प्रतिगृण्हीयात्॥ जुहूसादनपर्यंतं प्रस्तरस्य विमोकोन युक्त इत्यर्थः॥ तस्य प्रयोज
नमाह नेदिहेति॥ उक्तानि प्राय मेतत्॥ अथ जुह्वाः सादनं विधत्ते॥ अथ जुहूमिति जुहू

मादयज अनेन मंत्रेण प्रस्तरे सादयेन्नतु ग्रहणमात्रं मंत्रस्य सादनलिंगत्वादितनएवोक्तं कास्या
यनेन॥ जुहूं प्रतिगृह्य निदधाति घृताचीसेवमित्तरे उत्तराभ्यां प्रतिमंत्रमिति॥ घृताची
60 तिघृतमंचति प्राप्नोतीति घृताची सततप्रसिद्धमितिहेरर्थः॥ नाम्नानामधेयेनतएवसुप्र
जुहूर्हि न केवलं होमसाधनत्वादिस्यभिप्रायः मंत्रशेषो निगदसिद्ध इत्यभिप्रेत्यानुवदति।
सेदमिति॥ अथोपभृतः सादनं विधत्ते॥ घृताच्यस्युपभृन्नाम्नेसूपभृतमिति वाक्यशे
षः पूर्ववद्योज्यः॥ ध्रुवायाः सादनं विधत्ते॥ घृताच्यसि ध्रुवा नाम्नेति ध्रुवामिति॥ अन्यत्सू
र्ववत्॥ स्रुग्गताज्यव्यतिरिक्तस्य हविषः सादनं विधत्ते प्रियेणेति यदाज्याधैरन्यद्धविः
पुरोडाशादिकं प्रियेणेति मंत्रेण तत्सादयेदिति शेषः॥ स्रुकादीनां सादने विशेषमाह॥ सवा
इति॥ प्रस्तरस्योपरि जुहूमेव सादयेत्॥ तस्याधस्ताद्बर्हिषि इतरा उपभृद्ध्रुवाद्याः स्रुचः
सादयेदित्यर्थः॥ अतएवोक्तं सूत्रकृता॥ बर्हिष्युपभृतं ध्रुवां चेति तदेतदुपर्यधः सादन
मुपपादयति॥ क्षत्रं वा इति॥ स्वातंत्र्येणाहोमसाधनत्वाज्जुहूः क्षत्रियजातिः॥ उपभृदादी
नां तु जुहूवद्धोमे स्वातंत्र्याभावात्॥ प्रस्कृततत्स्थस्याज्यस्य जुकामानेयत्वात्तता वैश्यजाति
स्थानीयाः निगदसिद्धः शेषः समंत्रकमासन्नानां हविषामभिमर्शनं विधत्ते सोभिमृ
शतीति॥ मंत्रप्रतीकस्यार्थः प्रसिद्ध इति हिशब्देन व्याचष्टे॥ ध्रुवाहीति कर्मसमाप्तिपर्यं
तं नैश्चल्येन वेद्यां जुह्वाद्या उपसन्ना इत्यर्थः॥ ऋतस्य योनाविसस्य विवक्षितमर्थमा ६०

माह॥यज्ञोवा इति॥ऋतशब्दः सत्यशब्दपर्यायः॥सत्यफलकारणत्वादृतस्य योनिर्यज्ञः तादृ
गर्थपरत्वं युज्यत इति आह॥यज्ञोहीति॥यज्ञे खल्वेता जुह्वाद्या आसदनासादिताः स्थापिताः
अतः ऋतस्य योनाविसनेन यज्ञप्रतिपादनं युक्तमित्यर्थः॥मंत्रशेषमनूद्य व्याचष्टे॥ताविष्णो
इति॥फलभोक्तृतया स्वामित्वाद्यज्ञपतिशब्देन यजमानो विवक्षित इत्याह॥तं यजमानमिति
यज्ञं नयति निष्पादयतीति यज्ञनीरध्वर्युः अतो यज्ञन्यमिति यज्ञं नयतीति पदस्याध्वर्युपरतां
व्याचष्टे तद्यथात्मानमिति॥तन्नेन यज्ञन्यमित्यनेनाध्वर्युः स्वात्मानं यज्ञसकाशान्नांतरेति अं
तरितं वियुक्तं न करोति॥सिद्धप्रायमन्यत्॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रका
शे माध्यंदिनशतपथब्राह्मणे तृतीयाध्याये चतुर्थं ब्राह्मणं॥अथेध्माधानाग्निसमिंधनहेतु
भूताः सामिधेनीर्विधास्यन् तन्नामनी निर्वक्ति इध्मेह वा इति॥पंचदशसमिदात्मकेनानेन
अध्वर्युरग्निमिंधेह वै संदीपयति खलु॥एतदिति क्रियाविशेषणं॥तस्मादिंधनसाधन
त्वात् तस्येध्म इति नाम संपन्नं॥होता च सामिधेनीभिः प्रवोवाजा इत्यादिभिः ऋग्भिः अग्निं स
मिंधे अतः समिंधनसाधनत्वात्तासामपि सामिधेन्य इति नाम निष्पन्नं॥एवं नामनिर्वचनव्या
